M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 837

Title: Siddhant Chandro-
-daya

837

837

सिद्धान्त चंद्रोदय on तर्कसंग्रह

Siddhānta Chandrodaya : Title
on Tarka Saṁgraha : Author
: Editor
: Year, Vols.
: Publisher
837 : Remarks

837

अथसिंधातचंद्रोदयप्रारंभः

त०
टी० सि०
१

ॐ श्रीगणेशाय नमः ॥ श्रीसांबसदाशिवाय नमः ॥ ॐ यं वेदाः सततं स्तुवंति नितरां ध्यायंति यं योगिनो ॥ यस्माद्यादिभिदा न मुसक्कि रोणं दृश्नीयत
णेयः पुमान् ॥ तस्मिन् कृष्णसुताकृतार्द्धवपुषि प्रद्वात्मके शाश्वते ॥ मच्चित्तं रमतां सदा नयहरे श्रीमत्परब्रह्मणि ॥१॥ चित्रामान्वयसागरेंदि
मरुचेर्विद्वन्मणेः श्रीगुरोः कारुणीनाथसुभाभिधानजसतः कारुण्यबोधांबुधेः ॥ स्वांतः स्वांतगतांधकारतरणिं श्रीपादपंकेरुहद्वंद्वं संकलया
मि हृद्यममलं प्रत्यहं देवं शुभ्रं नम् ॥२॥ ज्ञात्वा तंत्रमनेकं श्रीकृष्णधूर्जटिदीक्षितः ॥ तर्कसंग्रहगूढार्थानि विवृणोमि यथामतिः ॥३॥ श्रीमद्विक्रमथ
दृणाधिपमहाराजाधिराजामित ॥ प्रद्युम्नश्रीगजसिंहभूपतनयश्रीराजसिंहप्रभोः ॥ सुज्ञानाय विनिर्मितोतिसुगमः सिद्धांतचंद्रोदयो ॥ रम्यः सा
धुतनोतु पंडितमनो हर्षं तरंगायितम् ॥४॥ ग्रंथादौ निर्विघ्नपरिसमाप्त्यर्थं मंत्रं भट्टोपाध्यायः ॥ शिष्टाचारानुमितश्रुतिबोधितकर्त्तव्यताकं न
मस्कारात्मकं मंगलमाचरन् ॥ श्रोतृप्रवृत्तये अनुबंधचतुष्टयं च दर्शयन् ॥ शिष्याणामवधानाय चिकीर्षितं ग्रंथं प्रतिज्ञां च कुर्वन् ॥ शिष्या
णां मंगलप्रवृत्तये ॥ आस्तिकमार्गप्रवृत्तये वा तन्निबध्नाति निधायेत्यादिना ॥ तर्क्यंते प्रमितिविषयीक्रियंत इति तर्काः ॥ द्रव्यादिपदार्थास्ते १
षां संग्रहः ॥ संक्षेपेणोद्देशः लक्षणपरीक्षा यस्मिन् ॥ सः क्रियंत इत्यर्थः नाममात्रेण वस्तुसंकीर्त्तनमुद्देशः ॥ यथा द्रव्यं गुण इति ॥ असा
धारणधर्मो लक्षणम् ॥ यथा गंधवत्त्वं पृथिव्याः ॥ लक्षितस्य लक्षणं संभवति न वेति विचारः परीक्षा ॥ ननु तद्रूपरचनाबलं बतं ॥ कीदृश
प्रयोजनायेत्यत आह सुखबोधायेति ॥ सुखेनानायासेन बोधाय ॥ पदार्थतत्त्वज्ञानायेत्यर्थः ॥ तथा च त्रिविधास्य शास्त्रस्य प्रवृत्तिरु

द्देशो लक्षणं परीक्षा चेति ॥ आद्यमंगमत्रोद्देशादेः कृतत्वात् अर्थतत्त्वज्ञानं भवत्येवेति भावः ॥ अत्रोद्देशस्य पदज्ञानं प्रयोजनं ॥ लक्षणस्य इ
तरभेदज्ञानमिति विवेकः ॥ परीक्षायाः लक्षणदोषपरिहार इति मंतव्यम् ॥ ननु कुसुमांजलि लीलावत्यादिग्रंथाध्ययनेनापि ॥ पदार्थतत्त्वज्ञा
न संभवे किमनेन ग्रंथरचनाबलेन नेत्यत आह ॥ बालानामिति ॥ तथा च तेषां मते ॥ दुर्बोधकत्वात्तत्र बालानां बोधो न भवतीति भा
वः ॥ अधीतव्याकरणकाव्यकोशोऽनधीतन्यायशास्त्रो बालः ॥ ननु आशीर्वादनमस्कारवस्तुनिर्देशभेदतः ॥ मंगलं त्रिविधं प्रोक्तं ॥ शास्त्रा
दावाशुसिद्धये इति मरदुक्तेः मंगलस्य ग्रंथादावावश्यकतया तदत्र कृतं ॥ कथं ग्रंथः क्रियत इत्यत आह ॥ निधायेति ॥ विश्वेशं जगत्कर्तारं ॥ श्री
सांबमूर्त्तिं हृदि मनसि निधाय नितरां ध्यात्वा ॥ गुरुवंदनं च विधायेत्यर्थः ॥ न चेश्वरमंगलेनैव सामंजस्ये गुरुवंदनमयुक्तमिति वाच्यं ॥ त्रि
वे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन ॥ गुरुरेव परं ब्रह्मेत्यादिवचनाद्गुरोरेवेश्वरत्वप्रतिपादनेन तस्यैवावश्यकत्वात् ॥ दृष्टं रमंगलं तु स
माप्तौ ॥ इतरसामग्रीसंपादनाय निरीश्वरवादिमतनिराकरणाय चेति ध्येयं यत्रेश्वरमंगलमेवास्ति ॥ तत्र तस्यैव प्राधान्यं दिवाकरदी
धितिरभावे दीपदीधितेश्चाप्युपादेयत्वादिति विवेकः ॥ इति श्लोकव्याख्या ॥ अथ मंगलेन समाप्तिकारणं ॥ कादंबर्यादौ मंगलसत्त्वे
पि ॥ समाप्त्यनुदयात् ॥ नास्तिकग्रंथे मंगलाभावेपि ॥ समाप्त्युदयात् अन्वयव्यतिरेकव्यभिचारादिति चेन्न यत्सत्वेस्वेतर यावत्कारणसत्त्वे ॥ य
त्समाप्तिस्तत्रैवान्वयत्वेन कादंबर्यादौ ॥ मंगलसत्त्वेपि ॥ कारणांतरस्यासत्त्वकल्पनेनान्वयव्यभिचाराभावात् ॥ नास्तिकग्रंथे ॥ कार्या

त० टी० सि० २

कारणमनुमेयमिति न्यायेनायं नास्तिकः कृतमंगलकः॥ विघ्नध्वंसपूर्वकपरिसमाप्तिमत्वात्॥ चैत्रवदित्यनुमानात् जन्मांतरीयमंगल
सिद्धेर्व्यतिरेकव्यभिचाराभावाच्च॥ ननु मंगलस्य श्रुतिबोधितकर्तव्यताकत्वे किं मानमिति॥ चेन्मंगलं श्रुतिबोधितकर्तव्यताकं॥ अलौ
किकत्वे सति शिष्टाचारविषयत्वात् दर्शादिवदित्यनुमानं॥ लौकिकव्यवहारवारणाय लौकिकेत्याचारविशेषणं॥ उन्मत्तकृतरात्रिश्राद्धादौ हेतोः सत्त्वा
द्व्यभिचारः॥ अतः शिष्टेति शिष्टत्वं च॥ नक्लिश्रद्धादिभिर्वेदानुमतकर्मकर्तृत्वं॥ आस्तिकाभासे व्यभिचारवारणाय तत्र श्रीत्यादि॥ चैत्यवं
दनप्रवृत्तबौद्धव्यभिचारवारणाय वेदानुमतेति॥ नक्लिश्यभ्याराधमत्वेन तज्ज्ञानं॥ अश्रद्धाचफलावश्यंभावनिश्चय इति संक्षेपः॥ नन्वास्तु मंग
लस्य विघ्नध्वंस एव फलम्॥ समाप्तिस्तु प्रतिबंधकाभावघटितकारणसमुदायादित्याहुः॥ इति मंगलवादः॥ तत्रोद्देशक्रमे वादौ कर्तव्यतया
तत्तुस्कारेण पदार्थान्विभजते द्रव्येति॥ ज्ञेयत्वादिकं पदस्यार्थः पदार्थ इति व्युत्पत्त्याभिधेयत्वं वा पदार्थसामान्यलक्षणं सप्तग्रहणं पदार्थत्वं द्रव्या
दिभेदसत्ताकाभाववत्त्वानूपसत्तान्यतमत्वं व्याप्यमिति व्यवच्छेदार्थः स्वरूपार्थं वा एवमग्रेऽपि॥ इति पदार्थसामान्यनिरूपणम्॥ द्रव्यं विभजते २
तत्रेति॥ तत्र सप्तपदार्थमध्ये इत्यर्थः॥ नवैवेति द्रव्याणि नवैवेत्यन्वयः॥ द्रव्यत्वजातिमत्त्वं गुणवत्त्वं॥ समवायिकारणत्वं वा॥ द्रव्यसामान्यल
क्षणं॥ द्रव्यत्वजातौ॥ इदं द्रव्यमिति प्रत्यक्षं॥ द्रव्यत्वनियतसमवायिकारणता॥ सा किंचिद्धर्मावच्छिन्ना कारणतात्वात्॥ दंडत्वनिकारणतावदि
त्यनुमानं वा॥ तादृशधर्मविधया द्रव्यत्वजातिसिद्धिः॥ न चाद्यक्षणे द्रव्यस्य निर्गुणत्वेन॥ कथं गुणवत्त्वलक्षणं॥ न च तदानीं तत्र गुणः

मानं

संभवति॥ पूर्वं परस्वरूपसमवायिकारणाभावात्॥ समानसामग्रीकत्वेन॥ परगुणयोर्भेदानस्यात्॥ कारणभेदस्यैव कार्यभेदे इति यामकत्वा
दिति चेन्मैवं॥ गुणसमानाधिकरणसत्ताभिन्नजातिमत्त्वस्य विवक्षितत्वात्॥ एकं रूपे रसात्पृथगिति प्रतीतिस्तु न समवायेन रूपे॥ पृथक्त्व नकर
मेकत्वं वा यथा गादृते गुणे गुणानंगीकारात्॥ किंत्वेतत्प्रतिपत्तिरेव तत् सामानाधिकरण्यसंबंधेन॥ अतस्तत्र नातिव्याप्तिरिति मंतव्यं॥ नवत्वं व्युत्पा
दयति॥ पृथिवीति॥ अपत्यमोवादः॥ ननु नीलं तमश्चलतीति प्रतीतेः॥ तमसो गुणक्रियावत्त्वेन द्रव्यत्वं सिद्धमिति॥ स्पर्शरहितत्वे सति रूपवत्त्वेन
नष्टपिवादावंत भौवोपितस्य॥ अतः कथं नवैवेति॥ चेत्र तस्य द्रव्यत्व॥ आलोकसहकृतेनैव चक्षुरिंद्रियेण ग्रहणं स्यात्॥ द्रव्यचाक्षुषप्रत्य
क्षे ह्यालोकसहकृत॥ चक्षुरिंद्रियस्य कारणत्वात्॥ अपवरकादीनामालोकमंतरेण कथं चाक्षुषमिति॥ चेत्र अदृष्टविशेषोपग्र उल्लूः
हात्तस्कादीदियस्यानुत्कृष्टालोक एव सहकारी नियम्यमानात्॥ विलक्षणत्वदर्शनात्॥ क्वचिदुत्कृष्टालोकस्यापि सहकारित्वे बाधकाभा
वात्॥ यद्वा अस्मदीयत्वेन द्रव्यचाक्षुषविशेषणात्॥ न च एतेषां वधे रेन आलोकसंयोगसत्वे॥ ग्रावकेण॥ कृतो न बदरादिचाक्षुषमिति
वाच्यं॥ आलोकसंयोगावच्छिन्नचक्षुः॥ संयोग एव चाक्षुषतिदानमित्यस्मादभिप्रायात्॥ तस्मात्तेजोऽभावप्रकाशकं तेजः॥ सामान्याभा
व एव तमः॥ यत्किंचित्तेजोऽभाववति॥ तमश्चापत्त्या सामान्यपदं॥ सुवर्णवति देशेऽन्धकाराभावात्॥ प्रकाशकपदं॥ अणुकादि
मत्यंधकाराभावापत्त्यायोग्यपदं॥ नीलं तमश्चलतीति प्रतीतिर्भ्रमः॥ उद्भूतस्पर्शस्याप्युपजपितुमशक्यत्वात्तमोऽभावो न तेज इति बोध्यं॥

त० दी० ति ३

इति द्रव्यसामान्यनिरूपणं ॥ गुणं विभजते रूपेति ॥ तत्रेत्यनुवर्त्तते ॥ गुणत्वजातिमान् पूर्ववत् ॥ अत्रादौ गुणग्रहणकरणे कुँवतिपाप्तिका ॥ द्र
व्यकर्मभिन्नत्वे सति सामान्यवान् गुणः ॥ आद्य कर्मणोरतिव्याप्ति॥वारणाय विशेषणदलं ॥ सामान्यादावतिव्याप्ति॥वारणाय विशेष्यदलं चतु
र्विंशतिर्गुणा इति ॥ द्रव्यकर्मणोरतिव्याप्ति॥वारणाय विशेषणदलं ॥ सामान्यादावतिव्याप्ति॥वारणाय विशेष्यदलं चतुर्विंशतिर्गुणा इति
रूपरसगंधस्पर्शाः ॥ संख्यापरिमाणे पृथक्त्वं ॥ संयोगविभागौ परत्वापरत्वबुद्धयः ॥ सुखदुःखेच्छाद्वेषप्रयत्नाश्चेति ॥ वैशेषिकसूत्रस्थ
अनुकूल चकारस्यानुज्ञायकत्वाद्ध गुरुत्वस्य गुरुत्वाभावरूपत्वादाज्ञस्पस्य कृतस्य भावरूपत्वाच्चतुर्विंशतित्वव्याघातः ॥ इति गुणसामान्यनिरूपण
म् ॥ कर्म विभजते उत्क्षेपणेति ॥ कर्मत्वजातिः ॥ प्रत्यक्षसिद्धा संयोगभिन्नत्वे सति ॥ संयोगासमवायिकारणं ॥ कर्मसंयोगभिन्नत्वे ॥ प
टादावव्याप्त्यतस्तदुक्तं ॥ संयोगेत्यादिकायपुस्तकसंयोगस्यासमवायिकारणं हस्त॥पुस्तकसंयोगस्तत्रातिव्याप्तिवारणाय सत्यंतम्
भ्रमणादीनां गमनेंतर्भावं वदिष्यत्यतो न पंचत्वविरोधः ॥ इति कर्मसामान्यनिरूपणं ॥ सामान्यं विभजते परमिति ॥ परसामान्य ३
मपरसामान्यमित्यर्थः ॥ परत्वं चाधिकदेशवृत्तित्वम् ॥ तथाहि ॥ द्रव्यादित्रिके ॥ सदिति उच्यते सत्ताभावः ॥ सत्वेनेत्युत्पत्तेः ॥ तत्र सत्ताना
मकश्च न धर्मः भावकार्यध्वंसकारणतावच्छेदकतया जातिविशेषसिद्धेति सा च सत्ता द्रव्यत्वाधिकरणे द्रव्ये वर्त्तमाना सत्यधिकदेशगु
णादावपि वर्त्तते ॥ अतः सा परसामान्यमित्युच्यते ॥ अपरत्वं च न्यूनदेशवृत्तित्वं वर्त्तते च द्रव्यत्वे गुणादिसाधारणसत्ताधिकरणगुण

पटत्वाद्यनेकेष्वेकत्वाभावादनेकत्व

देर्न्यूनदेशवृत्तित्वं ॥ न वृत्तित्वं ॥ अथैवं सति द्रव्यस ॥ पृथिवीत्वापेक्षयापरत्वात् ॥ परसत्त्वेति ॥ वस्तुमात्रग्राह्यसंगतिरितिचेन्न तस्यस
कलजात्यपेक्षयापरत्वाभिप्रायकत्वात् ॥ सामान्यत्वादिकं न जातिः ॥ किंतूपाधिः ॥ स द्विविधः ॥ सखंडोपाधिरखंडोपाधिश्चेति
॥ सखंडोपाधिस्तु ॥ बहुपदार्थघटितो धर्मः ॥ यथा उत्कृष्टत्वादिकं ॥ वस्तुमात्रमावर्ताभाववत्शरीरत्वेंद्रियत्वविषयत्वकारण
त्वकार्यत्वाकाशत्वकालत्वदिक्त्वादयश्च ॥ अखंडोपाधिश्चानिर्वचनीयो धर्मः ॥ मूलकारोक्तसामान्यादिलक्षणम् ॥ प्रसंगात्तत्रैव
प्रकाश्यते ॥ नित्यमनेकमनेकानुगतं सामान्यमिति ॥ सामान्यलक्षणे एकत्वमापातत्वः ॥ न च तल्लक्षणं संभवति ॥ घटत्वस्यैकभिन्नत्वात्तत्राकत्वेनै
कत्वानेकत्वयोर्विरोधात् यद्वा तत्सजातीयधर्मांतररहितस्वरूपं ॥ अनेकानुगतत्वं चानेकवृत्तित्वम् ॥ तच्च समवायेन बोध्यं ॥ तेनात्यंताभावे नाति
व्याप्तिः ॥ तस्याभावीय दैशिकविशेषणतासंबंधेन वृत्तेः ॥ इदं च संयोगादावप्यस्य तदुक्तं ॥ नित्यमिति ॥ गगनपरिमाणादिवारणायानेकेति ॥
इति सामान्यसामान्यनिरूपणम् ॥ विशेषं विभजते ॥ नित्येति ॥ स्वतो व्यावर्त्तकत्वं विशेषत्वम् ॥ विशेषः द्रव्यादित्रयः विशेषादित्यत्रस्वपमेव व्यावर्त्त
कोभवतीति जलक्षणसमन्वयः ॥ व्यावर्त्तकत्वं ॥ नामव्यावृत्तिजनकत्वं व्यावृत्तिश्चेतरभेदस्तज्ज्ञानं वेदमन्येभ्यस्फुटतरं ननु विशेष एवकिमर्थमाश्रयि
तव्यवृत्तिचेत्कथं ॥ घटादीनां कपालं ॥ समवेतत्वादिकं पटादिभेदकमस्ति ॥ परमाणूनां परस्परभेदकं न किंचिदस्त्यतो नायत्या विशेष ॥ आश्र
यितव्यः ॥ एवं चाशाद्वसमवायिकारणतावच्छेदकतया विशेषः सिद्ध इति ॥ अत एव मानपूर्वकत्वकारणतावच्छेदकं ॥ नित्यद्रव्यवृत्त्यद्र

त॰ टी॰ सि॰
४

तिश्चाश्रमकथनं ॥ इति विशेषनिरूपणं ॥ समवायस्यैकविधत्वादाह ॥ समवायस्त्विति ॥ नित्यसंबंधः समवायः संयोगवारणाय नित्येति ॥ गगना
दिवारणाय संबंधेति ॥ संबंधश्च संसर्गः स चाभिन्नत्वे सति ॥ संबंध्याश्रितः ॥ स्वभिन्नसंबंध्याश्रितः ॥ स्वभिन्नप्रतियोगिकः ॥ संबंधश्च व्यवहारहेतुर्वा ॥ अभावाद्यात्मक
स्वरूपसंबंधादिवारणाय भिन्नत्वं ॥ विशिष्टं स्वरूपसंबंधपरंपरासंबंधव्यवहारस्य गौणत्वेन ॥ तत्र संबंधत्वेनास्यानपेक्षितत्वात् ॥ संयोगसमवायावेव
मुख्यसंबंधौ ॥ ननु समवायसद्भावे किं मानमिति ॥ चेदत्र प्राञ्चः ॥ इह कपाले घटसमवाय इति प्रत्यक्षं नगादिरेनव्याप्तस्तु ॥ भूतलं घटसंयुक्तमिति ॥ वत्
गनं घटसंयुक्तमिति प्रत्यक्षानुदयात् संबंधप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुत्वेन समवायो न प्रत्यक्षः ॥ अतस्यातीन्द्रियसाधारणत्वात् ॥ किंत्वनुमेयः ॥ तथा
दृ
हि गुणक्रियादिविशिष्टज्ञानं ॥ तत्र किंचित्प्रकारकं ॥ किंचिद्विशेष्यकं ॥ किंचित्संसर्गकं चेति ॥ सर्वेणनन सिद्धं ॥ एवं सति रूपवान् घट इति ॥ विशिष्टज्ञानं ॥ वि
स
शेषणविशेष्योभयसंबंधविषयकं ॥ विशिष्टज्ञानत्वादित्यनुमानात् ॥ द्रव्ययोरेव संयोग इति ॥ नियमेन संयोगस्य बाधात् ॥ समवायसिद्धिरित्याहुः
प्रकारत्वं नाम विषयताविशेषः ॥ एवं विशेष्यत्वमपि ॥ प्रकारत्वं ॥ नाम भासमानवैशिष्ट्यप्रतियोगित्वं विशेष्यत्वं ॥ नाम भासमानवैशिष्ट्यानुयो
ति
गित्वं वैशिष्ट्यं नाम संबंधः ॥ दंडीति ज्ञाने भासमानवैशिष्ट्यं संयोगस्तत्प्रतियोगित्वं ॥ दंडे तदनुयोगित्वं ॥ पुरुष इत्यपि वदंति ॥ समवायस्यानेन स्वरूपं ४
संबंधः रूपाद्यात्मकानंतस्वरूपाणां संबंधत्वे गौरवात् ॥ तच्च समवायस्यैकत्वे रूपवान् ॥ वायुरिति प्रतीत्यापत्तिरिति ॥ वाच्यं रूपविशिष्ट
समवायाधिकरणतायास्तादृशप्रतीतिनियामिकायाश्चाभावसत्वात् ॥ इति समवायनिरूपणं ॥ अभावं विभजते ॥ अभाव इति ॥ भाव
भिन्नत्वं भाववत्त्वाभावः ॥ प्रतियोगिज्ञानाधीनज्ञानविषयत्वं वाऽभावत्वम् ॥ अखंडोपाधिरित्यपि केचित् ॥ भावत्वं च समवायैकार्थसमवायान्यत
शि

रसंबंधेन सत्तावत्त्वं ॥ अखंडोपाधिरित्यपि केचित् ॥ गुरुत्वस्याभावोऽधिकरणात्मक इत्युक्तं तन्न ॥ जलगतगंधाभावस्य घ्राणेनानुपपत्तेः ॥ जलस्य घ्राणे
नायोगादिति दिक् ॥ इति अभावसामान्यनिरूपणं ॥ अथ पदार्थानां साधर्म्यं वैधर्म्यं निरूप्यते ॥ सप्तानां ज्ञेयत्वादिकं साधर्म्यं ॥ द्रव्यादिषण्णां भाव
त्वं ॥ द्रव्यादिपंचानां भावत्वे सत्यनेकत्वं ॥ समवायेन संबंधित्वं च ॥ द्रव्यादिचतुर्णां समवेत ॥ समवेतत्वं ॥ द्रव्यादित्रयाणां सत्तावत्त्वं ॥ द्रव्यगुणयोर्नि
त्यानित्योभयवृत्तित्वं ॥ भिन्नजातिमत्त्वं कर्मादिवृत्तिजातिमत्त्वं वा गुणकर्मणोः समवायिकारणत्वं ॥ गुणादिपंचानां गुणशून्यत्वं कर्मशून्यत्वं च सामान्या
दिचतुष्टयस्य सामान्यशून्यत्वं ॥ येषां यत्साधर्म्यं तदितरेषां ॥ तद्वैधर्म्यमिति ज्ञेयम् ॥ इति श्रीसिद्धचंद्रोदये तर्कसंग्रहव्याख्याने पदार्थोद्देशविभागनि
रूपणं नाम प्रथमः परिच्छेदः ॥ १ ॥ पदार्थान्विभज्य संप्रति तेषामुद्देशक्रमानुसारेण लक्षणं वक्तुमुपक्रमते ॥ गंधवतीति गंधवत्त्वं च समवायेन बोध्य
म् ॥ तेन कालिकसंबंधेन ॥ काले दैशिकसंबंधेन दिशि गंधवत्त्वस्य सत्वेपि न क्षतिः ॥ तयोस्तेन तेन संबंधेनैव ॥ सर्वाधारत्वात् ॥ अथ एतदेव हि लक्षणं य
व्याप्यति द्व्याप्यति ॥ व्याप्त्यसंभवरूपदोषत्रयशून्यम् ॥ यथा गोः सास्नादिमत्त्वं ॥ अव्याप्तिश्च लक्ष्यैकदेशावृत्तित्वं ॥ अत एव गोर्न कपिलत्वं लक्षणं ॥ तस्याव्या
प्तिग्रस्तत्वात् ॥ अतिव्याप्तिश्च लक्ष्यवृत्तित्वे सत्यलक्ष्यवृत्तित्वं ॥ अत एव गोर्न शृंगित्वं लक्षणं ॥ तस्यातिव्याप्तिग्रस्तत्वात् ॥ असंभवश्च लक्ष्यमात्रावृत्ति
त्वं ॥ अत एव गोर्नैकशफत्वं लक्षणं ॥ तस्यासंभवग्रस्तत्वात् ॥ एवं गंधवत्त्वस्य जलस्यैकदेशपाषाणमुक्ताहीरकादावृत्तित्वरूपाव्याप्तिग्रस्तत्वात्कथं ॥ त
ल्लक्षणमिति ॥ चेन्न ॥ तद्भस्मनि गंधोपलंभेन ॥ तत्रापि गंधकल्पनात् ॥ तस्यानुभूतत्वादनुपलंभ ॥ अनुद्भूतत्वं नातिस्तदभावउद्भूतत्वमिति गंगे

तं
सि॰टी॰
५

शेषाध्यायः॥उद्भूतत्वंजातिस्तद्भावेनुद्भूतत्वमितिनिजरत्नैयायिकाः॥तदुभयमपिसंकरस्य॥जातिबाधकत्वपक्षेनसाधीयः॥शुक्लत्वादिनासंकरात्॥तथाहि
॥संकरश्चपरस्परात्यंताभावसमानाधिकरणयोर्धर्मयोरेकत्रसमावेशः॥अनुद्भूतत्वमपहायशुक्लत्व॥मुद्भूतशुक्लेऽस्तिशुक्लत्वमपहायाप्युद्भूतत्व
मनुद्भूतेगंधे॥तदुभयमप्यनुद्भूतशुक्ले॥इत्यनुद्भूतत्वस्यापि॥तदुक्तं॥व्यक्तेरभेदस्तुल्यत्वं॥संकरोथानवस्थितिः॥रूपहानिरसंबंधो॥जातिबाधिकसं
ग्रहइति॥तस्मात्स्वत्वउद्भूतत्वाभाववत्वं॥उद्भूतत्वंचप्रत्यक्षयोग्यरूपरसगंधस्पर्शसंयोगाद्यन्यतमत्वमित्यलमप्रस्तुतविचारेण॥अथैवमपि॥
सुरभ्यसुरभिकपालजन्यघटेपरस्परप्रतिबंधेनगंधानुत्पत्तेरव्याप्तिः॥नचतादृशघटेगंधप्रतीतेश्चित्रगंधप्राप्तिरिति॥अवयवगंधस्यैव॥तत्र
भानांगीकारादितिचेत्तगंधवत्वसमानाधिकरणजलत्वासमानाधिकरणजातिमत्वस्यविवक्षितत्वात्॥जलादावतिव्याप्तिवारणायजलत्वेत्यादितेजोवार
णायगंधवत्वमित्यादिपृथिवीतेजोन्यतरत्वमादायतेजसिदोषवारणायजातिपदं॥इतिपृथिवीलक्षणं॥ननलक्षणस्यकिंलक्षणमिति॥चेदुच्यतेताव
च्छेदकसमनियतत्वमितिचेद्धि॥अत्रपृथिवीलक्ष्या॥तद्वृत्तिलक्ष्यतायाअवच्छेदकंपृथिवीत्वं॥तत्समनियतत्वस्य॥गंधेवृत्तेर्लक्षणसमन्वयः॥अवच्छे
दकत्वंचस्वरूपसंबंधविशेषः॥अन्यूनानतिरिक्तवृत्तित्वमित्यपिकेचित्॥समनियतत्वंचतद्व्याप्यत्वेसति॥तद्व्यापकत्वंयस्यप्रथममुपादानं॥तद्व्या ५
प्यमितिमंतव्यं॥तदुक्तं॥व्याप्यस्यवचनंपूर्वं॥व्यापकस्यततःपरं॥एवंपरीक्षिताव्याप्तिः॥स्फुटीभवतितत्वतइति॥ननुलक्षणस्यकिंप्रयोजनमि
ति॥चेदितरभेदानुमितिरिपिविद्धिनचैवं॥सतीतरभेदात्मिकायाव्यावृत्तिस्तस्याअपिपृथिव्यसाधारणधर्मत्वेनसापिलक्षणमितिवक्तव्यं॥एवंस

तिपृथिवीतरभेदवती॥इतरभेदादित्यनुमानासंभवेनतस्याःप्रयोजनाप्रसिद्धिः॥एवंजगदितरस्यैव॥प्रसिद्ध्यातल्लक्षणीभूतज्ञेयत्वस्यापीतिवाच्यं॥अ
साधारणधर्मोद्विविधः॥व्यावर्तकोऽव्यावर्तकश्च॥तत्रव्यावर्तकरूपासाधारणधर्मस्यैवलक्षणत्वात्॥तस्यचव्यावृत्तिरूपप्रयोजनप्रदर्शनात्॥अथैवंस
ति॥लक्षणेलक्षणस्य॥व्यावर्तकेऽतिव्याप्तिःव्यावृत्तेःपृथिवीत्वसमनियतत्वात्॥ज्ञेयत्वस्यचपदार्थत्वसमनियतत्वादितिचेन्नैवं॥तद्भिन्नत्वस्यापिलक्ष
णेनिवेशात्॥स्वस्मिन्स्वभेदानंगीकारेणज्ञेयत्वादौज्ञेयत्वादिभिन्नत्वस्यासंभवात्॥यदिच्चासाधारणधर्ममात्रंलक्षणमितिसिद्धांतव्याघातः॥एवं
ज्ञेयत्वादिकंपदार्थसामान्यलक्षणमिति॥पूर्वोक्तमप्यसंगतमित्युच्यते॥तदाअसत्वसाधारणधर्ममात्रं॥लक्षणंतस्यचव्यावृत्तिर्व्यवहारोपिप्रयो
जनमितिमंतव्यं॥तदुक्तं॥व्यावृत्तिर्व्यवहारोवालक्षणस्यप्रयोजनमिति॥इतिलक्षणनिरूपणम्॥पृथिवींविभजतेसेतिद्वैविध्य॥मुत्पादयति॥नित्येति॥
नित्यत्वं॥ध्वंसभिन्नत्वेसति॥ध्वंसाप्रतियोगित्वं॥अनित्यत्वंच॥ध्वंसप्रतियोगित्वं॥परमाणुरूपेति॥ननुपरमाणुसद्भावेकिंमानमितिचेदुच्यते॥गवाक्ष
रंध्रेतरणिकिरणस्थं॥सर्वतःसूक्ष्मंयद्रजउपलभ्यते॥तत्त्र्यणुकमित्यभिधीयते॥तत्त्र्यणुकमवयवजन्यंचाक्षुषद्रव्यत्वात्घटवदित्यनुमानेनत्र्यणुकाव
यवःसिध्यंति॥सएवद्व्यणुकमित्युच्यते॥सोप्यवयवजन्यः॥महदारंभकत्वात्कपालवदित्यनुमानेनद्व्यणुकावयवःसिध्यति॥सएवपरमाणुरित्युच्यते॥
अनवस्थाभियावयवधारानोरीक्रियते॥अन्यथामेरुसर्षपयोरपिसाम्यप्रसंगः॥इतिपरमाणुप्रमाणदर्शनं॥कार्यरूपेति॥अवयविनीचेत्यपिबोध्य
म्॥अत्रनास्तिकाः॥अवयविसद्भावेनोमानम॥अयंघटइतिप्रतीतिर्हि॥परमाणुपुंजैरेवोपपद्यतइतितन्न॥परमाणूनामतींद्रियत्वेन॥घटस्याप्यतींद्रि

त० सि०टी० ६

यत्रापत्तेः॥ केशसमूहेन दृष्टांतः एकस्मादपि त्रसरेणुसंभवेन दृष्टांतवैषम्यात्॥ इति परमाणुपुंजवादः॥ कार्यरूपपृथिवीं विभजते॥ पुनरिति कार्यरूपेति विशेष
णं एवमग्रेऽपि॥ त्रैविध्ये हेतुमाह॥ शरीरेति॥ शरीरभेदादिंद्रियभेदाद्विषयभेदादित्यर्थः॥ अंत्यावयवित्वे सति चेष्टाश्रयत्वं शरीरत्वं॥ हस्तादिवारणाय सत्यंतं॥ घ
टादिवारणाय विशेष्यं॥ अंत्यावयवित्वं चावयवजन्यत्वे सत्यवयव्यजनकत्वं॥ अवयवत्वं च॥ द्रव्यसमवायिकारणत्वं अवयवित्वं च॥ जन्यद्रव्यत्वं॥ चेष्टा च
हिताहितप्राप्तिपरिहारार्था क्रिया॥ तदिदं शरीरं द्विविधं योनिजमयोनिजं च॥ शुक्रशोणितपरस्परमेलनजन्यं शरीरं योनिजं॥ तद्भिन्नं शरीरमयो
निजं॥ योनिजमपि द्विविधं॥ जरायुजमंडजं च॥ गर्भवेष्टकचर्मपुटकं॥ जरायुस्तज्जन्यं शरीरं जरायुजमिदं चास्मदादीनां॥ अंडजं पक्ष्यादीनां॥ अ
योनिजं त्रिविधं॥ स्वेदजमुद्भिज्जमदृष्टविशेषजन्यं च॥ स्वेदजं यूकालिक्षादीनां॥ उद्भिज्जं वृक्षादीनां॥ अदृष्टविशेषजन्यं मन्वादीनां॥ ननु वृक्षादीनां
॥ शरीरत्वे किं मानमिति चेन्मैवं स्यात्॥ वृक्षाः शरीरं॥ आध्यात्मिकवायुसंबंधादिति॥ तदनुमानात्॥ ननु तत्रैवमानं न पश्याम इति चेद्वृक्षाः॥ आध्या
त्मिकवायुसंबंधवान्॥ छिन्नस्यादिमत्वादित्यनुमानं कल्पय॥ इति शरीरसामान्यनिरूपणं॥ शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञान राम
कारणमनःसंयोगाश्रयत्वमिंद्रियत्वं॥ शब्देतरेति॥ उद्भूतविशेषगुणाः॥ उद्भूतरूपादयस्तदनाश्रयत्वं॥ ज्ञानस्य कारणीभूतो यो मनःसं ६
योगस्तदाश्रयत्वं चक्षुरादावस्तीति लक्षणसमन्वयः॥ नवत्येवेंद्रियमनः॥ संयोगस्तथा॥ आत्मा मनसा संयुज्यते मन इंद्रियेणेंद्रियमर्थेनेति॥ त
तः प्रत्यक्षमिति नियमात्॥ आत्मवारणाय सत्यंतं॥ कालवारणाय विशेष्यं॥ श्रोत्रेऽव्याप्तिवारणाय शब्देतरेति॥ चक्षुरिंद्रियदावव्याप्ति॥

वारणाय उद्भूतेति॥ इंद्रियार्थसंयोगाश्रयत्वस्य चक्षुरादेरसत्वाद्विशेषगुणेति॥ स्वध्वंसकारणीभूतः कालमनःसंयोगस्तदाश्रयत्वं॥ काल इति ज्ञानपदं॥ इंद्रिया
व्ययवार्थविषययोः सन्निकर्षोऽपि ज्ञानकारणं॥ तदाश्रयत्वमिंद्रियावयवेगतं॥ यद्वा कालेन रूपं नास्तीति प्रत्यक्षं प्रति चक्षुःसंयुक्तविशेष्यतायाः कारणत्वेन तद्धटकी
भूतसंयोगाश्रयत्वं कालेऽगतं॥ अतो मनःपदं॥ न चात्मवारणाय आत्मान्यत्वमेव न विशेषणतामिति॥ प्रंकसत्वऽमनः॥ संयोगस्य ज्ञानकारणतापक्षे तद्विशेषात्॥ ॥ इ
तींद्रियसामान्यनिरूपणम्॥ भोगो यत्संयोगी विषयः॥ भोगश्च सुखदुःखसाक्षात्कारः॥ यद्येवं लक्षणं शरीरादौ वेति आप्नमिति॥ विभजते॥ तत्र शरीरेंद्रियभिन्न
त्वं तदनुसारतस्तु शरीरादिकमपि विषय एवं नेदं नकीर्तितं॥ वालधीवैशिघाय॥ इति विषसामान्यनिरूपणम्॥ पार्थिवं शरीरं दर्शयति॥ शरीरमिति॥
आदिपदेन पश्वादीनां परिग्रहः॥ गंधवच्छरीरं पार्थिवशरीरमिति॥ तल्लक्षणं॥ एवमग्रेऽपि॥ अत्र जलादिपंचानां मेलनलब्धान्यांच भौतिकव्यवहारः॥ पार्थिव
भागस्य मुख्यत्वात्पार्थिवत्वं॥ एवमन्यत्रापि॥ पार्थिवेंद्रियस्य लक्षणमाह॥ इंद्रियमिति॥ सन्निकर्षव्यभिचारवारणाय द्रव्यत्वं निवेश्यं॥ अथ पार्थिवेंद्रियं दर्श
यति॥ इंद्रियमिति॥ गंधवदिंद्रियं पार्थिवेंद्रियमिति॥ न लक्षणं बोध्यं॥ एवमग्रेऽपि॥ तत्प्रयोजनमाह॥ गंधग्राहकमिति॥ इदमुपलक्षणं॥ येनेंद्रियेण यद्गृह्यते
॥ तेनेंद्रियेण तज्जातिस्तदभावश्च गृह्यते॥ इतीति यमाद्गंधत्वादेरपि ग्राहकमित्यर्थः॥ एवमग्रेऽपि न॥ ननु वस्तुगंधग्राहकत्वेन घ्राणनामकमिंद्रियं॥ तथापि
तस्य पार्थिवत्वे किं मानमिति चेत्॥ घ्राणेंद्रियं पार्थिवं रूपादिषु पंचसु मध्ये गंधस्यैवाभिव्यंजकत्वात्॥ कुंकुमगंधाभिव्यंजकगोघृतादिवद्वा यूपनीतसुरभि
पार्थिवभागवदित्यनुमानं मानं॥ न च शरावगतजलगंधव्यंजकजलेव्यभिचारवारणाय मैवकारः॥ मध्यांतोपादानं घ्राणस्य गंधत्वव्यंजकत्वेऽपि न क्षतिः॥ त

त० सि० टी० ७

ससंकेतमाह॥ घ्राणमिति॥ घ्राणपदप्रतिपाद्यमित्यर्थः॥ तदाश्रयमाह॥ नासाग्रेति॥ पार्थिवविषयं दर्शयति॥ विषय इति॥ अत्रादिना पुष्पादिपरिग्रहः॥ गंधवा
न्विषयः॥ पार्थिवविषय इति॥ तल्लक्षणं बोध्यं॥ इति पृथिवीग्रंथः॥ जलं लक्षयति॥ शीतेति॥ न च चंदनं शीतं शीतं शिलातलमित्यादिप्रतीतेः॥ पृथिव्या
मतिव्याप्तिरिति वाच्यं॥ जलसमवेतशीतस्पर्शस्यैव॥ स्वसमवायिसंयोगसंबंधेन तत्र भानात्॥ जलं विभजते॥ तादृतिशरीरमिति॥ इदमयोनिजमेव॥
एवमुत्तरत्रापि ज्ञेयं॥ ननु जलीयशरीरस्य॥ न खदंतकराद्य॥ संभवेनाहारविहाराद्यसंभवात् कथं भोगायतनत्वमुपपद्येत॥ इति चेन्मैवं मंस्थाः॥ पार्थिवा
दिभागसंमिश्रितत्वेन करकादिवद्घनीभूय दृढीभूतस्य तस्य तात्वादिव्यापारादिसंभवेनाहारविहारादिसंभवाद्भोगायतनत्वोपपत्तेः॥ एवमुत्तरत्रा
पि ज्ञेयं॥ इंद्रियमिति रसनेंद्रियस्य जलीयत्वे॥ रसनेंद्रियं॥ जलीयं रूपादिषु॥ पंचसु मध्ये रसस्यैवाभिव्यंजकत्वात्॥ लालादिवदिति॥ अनुमानं मानं॥ वि
षय इति॥ आदिना तटाकहिमकरकादिसंग्रहः॥ अथ हिमकरकादीनां जलत्वे॥ तत्र नैमित्तिकद्रवत्वं न स्यादिति चेत् को वा नेति ब्रूते॥ अदृष्टविशेषेण घनीभा
वात्॥ सांसिद्धिकद्रवत्वप्रतिबंधमात्रकस्य नात्॥ इति जलग्रंथः॥ तेजसो लक्षणमाह॥ उष्णस्पर्शवदिति॥ उष्णं जलमिति धीस्तु॥ जलगततेजो॥ निरोष्म
स्पर्शस्यैव॥ चंद्रकिरणादौ॥ तदंतर्वर्त्तिवारिस्पर्शाभिभूतत्वादुष्णस्यानुपलंभः॥ चक्षुरादावनुद्भूतत्वात्तस्य तथा॥ तेजो विभजते॥ तदिति॥ चक्षुरिति चक्षु राम० ७
षस्तैजसत्वे॥ चक्षुस्तैजसं रूपादिपंचसु मध्ये॥ रूपस्यैवाभिव्यंजकत्वात्॥ दीपप्रभावदित्यनुमानं प्रमाणं॥ रूपग्राहकमिति॥ महत्वोद्भूतरूपस्पर्शवद्द्रव्यतद्
त्तिकर्मसामान्यसमवायसंख्यापरिमाणपृथक्त्व॥ संयोगविभागपरत्वापरत्वद्रवत्वस्नेहानामपि ग्राहकमिति॥ इष्टव्यं॥ ननु वह्निरिंद्रियस्य॥ वस्तुप्राप्य

॥ प्रकाशकारित्व॥ नियमेन कनीनिकाग्रवर्त्ति॥ चक्षुषो घटादिना॥ कथं प्राप्तिरिति चेत्॥ दीपप्रभाया इव॥ तस्यापि॥ तत्प्राप्तिसंभवः॥ तेजसोऽतिशयवे
गविकारशालित्वात्॥ प्रशस्तपदभाष्यानुसारेण विषयस्य चातुर्विध्यमाह॥ विषय इति॥ अन्यत्र नउद्भूतरूपोद्भूतस्पर्शवान् अनुद्भूतरूपानुद्भूतस्पर्शवा
नुद्भूतरूपानुद्भूतस्पर्शो वानुद्भूतस्पर्शोद्भूतरूपवानिति चातुर्विध्यमुक्तं॥ चातुर्विध्ये हेतुमाह॥ भौमेति॥ भेदादिति॥ पदं प्रत्येकमभिसंबध्यते॥ तत्र॥ भौममु
दाहरति॥ भौममिति॥ पार्थिवमात्रेंधनं॥ तेजो भौमं॥ वह्न्यादिकमित्यत्रादिपदेन खद्योतगततेजः प्रभृतेः॥ परिग्रहः॥ दिव्यं दर्शयति॥ दिव्यमिति॥ जलमात्रेंधनं॥
तेजो दिव्यं॥ कश्चित्तु उक्तेऽविधनं दिव्यमित्यपि पाठः॥ आदिना अर्कचंद्रादीनां परिग्रहः॥ पार्थिवजलोभयेंधनं तेजश्चोदर्यं तदेवाभिधत्ते॥ भुक्तेति॥ भुक्तस्यान्ना
देः पीतजलस्य च॥ परिणामो जीर्णतातस्य हेतुरौदर्यमित्यर्थः॥ आकरजं दर्शयति॥ आकरजमिति॥ आकरजं सुवर्णादिकमित्यत्रादिना॥ रजतादेः परिग्रहः
अथ सुवर्णवादः॥ ननु सुवर्णं पार्थिवं॥ पीतत्वाद्धरिद्रादिवदिति चेन्नैतत्॥ घृतजतुप्रभृतिष्वत्यंतानलसंयोगे सति॥ द्रवत्वनाशोपलंभेन पार्थिवद्रवत्वना
शंप्रत्यंतानलसंयोगस्य॥ कारणत्वेन सुवर्णे तादृशसंयोगे सति॥ द्रवत्वनाशापत्तेः॥ मीमांसकास्तु नमइव॥ सुवर्णमप्यतिरिक्तं द्रव्यमिति शशंकिरे॥ तदपि न सु
क्तं॥ तेजस्यंतर्भावे॥ संभवत्यतिरिक्तद्रव्यकल्पनाया अन्याय्यत्वात्॥ ननु सुवर्णस्य तैजसत्वे॥ किं प्रमाणमिति चेत्॥ सुवर्णं तैजसं मत्यंतानलसंयोगेऽप्यनु
च्छिद्यमान॥ द्रवत्वाधिकरणत्वात्॥ यन्नैवं तन्नैवं यथा सर्पि[illegible]रिति॥ पार्थिवरूपस्पर्शाभ्यां॥ तत्र विशिष्टभास्वररूपोष्णस्पर्शयोरभिभूतत्वादग्रहः॥ इति संक्षे
पः॥ इति तेजोग्रंथः॥ वायुं लक्षयति॥ रूपरहित इति॥ घटादिवारणाय विशेषणं॥ आकाशादिवारणाय विशेष्यं॥ अथ वायुप्रत्यक्षतावादः॥ ननु वायु

त० सि० टी० ८

सद्भावे किं प्रमाणमिति चेदत्रोच्यते॥ विषयतासंबन्धेन वहिरिन्द्रियजन्यप्रत्यक्षत्वावच्छिन्नं प्रति समवायसंबन्धेन महत्त्वविशिष्टोद्भूतरूपमुद्भूतस्पर्शश्च कारणं॥ एवं स
ति वायोः तदभावान्न वायुः प्रत्यक्षः॥ किं त्वनुमेयः॥ तथा हि॥ योऽयं वायौ वाति सति अनुष्णाशीतस्पर्शः प्रतीयते स स्पर्शः किंचिदाश्रितः॥ गुणत्वाद्रूपवदित्यनुमानेन यत्किंचि
त्तदाश्रयः सिध्यति तदेव वायुरित्युच्यते॥ न च तत्पृथिवी भवितुमर्हति॥ उद्भूतस्पर्शवत्पार्थिवस्योद्भूतरूपवत्त्वनियमात्॥ नापि जलं तेजो वा॥ तत्रानुष्णाशीतस्पर्शा
भावात्॥ नाप्याकाशादिचतुष्टयं॥ तस्य विभुत्वेन सर्वत्र तादृशस्पर्शप्रत्यक्षापत्तेः॥ नापि मनः तस्याणुत्वेन स्पर्शस्याप्यनध्यक्षापत्तेरित्याहुः॥ नवीनास्तु वहिरिन्द्रि
यप्रत्यक्षं प्रति महत्त्वविशिष्टविभुव्यावृत्तविशेषगुणः॥ महत्त्वविशिष्टोद्भूतरूपोद्भूतस्पर्शान्यतरद्वा कारणं॥ एवं सति वायुरपि प्रत्यक्ष एव॥ इतरथा
वायुं स्पृशामि प्रभां पश्यामि॥ तप्तजले तेजः स्पृशामीत्याद्यनुभवापलापप्रसंगः॥ न चायं भ्रमः जलं स्पृशामीत्यनुभवस्यापि तथात्वापत्तेरित्याचक्ष
ते वायुं विभजते॥ स द्विविध इति शरीरमिति॥ तच्चापिशाचादीनामपि॥ स्पर्शग्राहकमिति॥ इदमुपलक्षणं॥ महत्त्वोद्भूतरूपस्पर्शवत् इयत्तद्वृत्तिकर्मसा राम
मान्यसमवायसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वस्नेहानामपि ग्राहकं॥ त्वगिति त्वगिन्द्रियमित्यर्थः॥ तस्य वायवीयत्वे त्वगिन्द्रियं ८
वायवीयं रूपादिषु पंचसु मध्ये स्पर्शस्यैवाभिव्यंजकत्वात्॥ अंगसंगिसलिलशैत्याभिव्यंजकव्यजनपवनवदित्यनुमानं मानं॥ वृक्षादीत्यत्रादिपदेन
लतादीनां परिग्रहः॥ ननु प्राणस्याधिकस्य सत्त्वात् कुतो न कृतस्तद्विभाग इत्यत आह॥ शरीरान्तरिति॥ अपां च विषयवायौ तस्यान्तर्भाव इति तात्पर्यं॥ अ
पानादेः प्राणेऽन्तर्भावमभिधत्ते॥ स चेति॥ प्राणस्त्वित्यर्थः॥ एकोऽपीति॥ एक एव प्राणो हृदादिनूपोपाधिभेदात्॥ प्राणापानादिशब्दैर्व्यवह्रियत इत्यर्थः॥

अयं वायुर्मुखनासिकाभ्यां निर्गमनप्रवेशनात्प्राणः॥ मलादेरधोनयनादपानः॥ भुक्तपरिणामाय जठरानलस्य॥ समुन्नयनात्समानः॥ अन्नादेरूर्ध्वनयनादुदा
नः॥ नाडीमुखेषु वितननाद्व्यानः॥ इति क्रियारूपोपाधिभेदात्॥ तथा व्यवह्रियत इत्यर्थः॥ एवं नागकूर्मकृकलदेवदत्तधनंजयात्मकवायूनामपि प्राणेऽन्तर्भा
वः॥ नाग उद्गारस्य हेतुः॥ कूर्म उन्मीलनस्य॥ कृकलः क्षुधायाः॥ देवदत्तो विजृंभणस्य॥ धनंजयः पोषणस्येति बोध्यं॥ इति वायुग्रन्थः॥ इदानीं कार्यद्रव्यस्योत्पत्तिवि
नाशक्रममाचक्ष्महे॥ परमेश्वरस्य चिकीर्षावशात्परमाणुषु कर्मोत्पत्तिः॥ तदनंतरं द्वयोः॥ परमाण्वोः॥ संयोगस्ततः॥ द्व्यणुकोत्पत्तिः॥ तत्र परमाणुः
समवायिकारणं॥ परमाणुद्वयसंयोगोऽसमवायिकारणं॥ परमेश्वरस्तज्ज्ञानं॥ तदिच्छा तत्कृतिः॥ कालो दिक् प्रागभावो दृष्टं प्रतिबन्धकाभावश्च निमित्तकारणं॥
एतेषां कार्यमात्र एव॥ निमित्तकारणत्वं॥ तदनंतरं त्रिषु द्व्यणुकेषु कर्मोत्पत्तिस्ततस्तेषां संयोगस्ततस्त्र्यणुकोत्पत्तिः॥ एवं चतुरणुकाद्युत्पत्तिक्रमेण महा
पृथिवी॥ महत्य आपः महत्तेजः॥ महान्वायुरुत्पद्यते॥ ननु त्रिभिः परमाणुभिः॥ कुतो न द्व्यणुकमारभ्यते द्व्यणुकद्वयेन कुतो न त्र्यणुकमिति चेन्न॥ प्रथमस्य द्व्या
रंभकत्वे गौरवात्॥ द्वितीयस्य च तथात्वे॥ अणुकमहत्त्वानुपपत्तेः॥ कार्यमहत्त्वे कारणमहत्त्वस्य कारणबहुत्वस्य वा कारणत्वात्॥ एवं परमेश्वरस्य कार्य
द्रव्यसंजिहीर्षावशात्परमाणुषु कर्मोत्पत्तिः॥ ततः परमाणुद्वयस्य विभागस्ततः॥ परमाणुद्वयसंयोगनाशस्ततो द्व्यणुकनाशः॥ ततस्त्र्यणुकनाशः
॥ एवं चतुरणुकादिनाशक्रमेण महापृथिव्यादीनां नाशः॥ अयमेवावान्तरप्रलय इत्युच्यते॥ सर्वकार्यद्रव्यध्वंसस्यैवावान्तरप्रलयत्वात्॥ महाप्रलयश्च
॥ सर्वभावकार्यध्वंसः॥ भावकार्यं च अतीतद्रव्यमनित्यगुणः॥ कर्म च किं पुनः सृष्टिप्रलययोः सद्भावे प्रमाणमिति चेद्धाता यथापूर्वमकल्पयदित्यादिश्रुतिः॥

त० सि० टी० ९

मीमांसकास्तु संसारप्रवाहस्य॥ बीजांकुरन्यायेनानादित्वादनंतत्वाच्च॥ प्रलयसद्भावे प्रमाणाभाव इत्याहुः॥ क्वचित्समवायिकारणनाशाद्द्रव्यनाशः॥ क्वचिदस
मवायिकारणनाशाद्द्रव्यनाश इत्याहुः॥ इतरे तु आद्यवाक्ये सर्वत्रासमवायिकारणनाशाद्द्रव्यनाशमंगीचक्रुरित्यलं पल्लवितेन॥ इति कार्यद्रव्योत्पत्तिविना
शक्रमनिरूपणम्॥ आकाशं लक्षयति॥ शब्दगुणमिति॥ शब्दो गुणो यस्य तत्तथा॥ यद्यपि॥ शब्दवत्त्वमेव लक्षणमुचितं॥ तथापि भाट्टमीमांसकमते॥ श
ब्दस्य द्रव्यत्वं तन्निरासार्थं गुणपदमुपात्तं॥ कुचित्तु शब्दगुणकमाकाशमित्यपि पाठः॥ शब्दगुणमेव शब्दगुणकमिति स्वार्थे कप्रत्ययः॥ पक्षाशब्दगुणं क
रोति जनयतीति शब्दगुणयति॥ शब्दगुणयतीति शब्दगुणकं शब्दसमवायिकारणमिति यावत्॥ एतेनाकाशे प्रमाणमपि दर्शितं॥ तथाहि॥ श
ब्दः अष्टद्रव्यातिरिक्तद्रव्याश्रितः॥ अष्टद्रव्यानाश्रितत्वे सति समवायिकारणकत्वात्॥ यन्नैवं तन्नैवं॥ यथा रूपमिति॥ परिशेषानुमानेन॥ ता
दृशद्रव्यविधयाकाशसिद्धिरिति॥ रूपत्वादिचारणाय विशेष्यं परिशेषश्च प्रसक्तस्य॥ प्रतिषेधेन्यत्राप्रसंगात्परिशेष्यमाणे संप्रत्ययः॥ न च विशि राम० ९
ष्टासिद्धिः शब्दः समवायिकारणकः जन्यगुणत्वात्॥ पृथिवीरूपवदित्यनुमानेन तत्सिद्धेः॥ न च विशेषणासिद्धिरपि॥ शब्दः अष्टद्रव्यानाश्रितः॥ श्रो
त्रग्राह्यत्वात्॥ शब्दत्ववदित्यनुमानेन तस्यापि सिद्धेः॥ ननु तस्य गुणत्व॥ एव किं मानमिति चेत्॥ शब्दो गुणः॥ अनित्यत्वे सत्येकेंद्रियग्राह्यजातीमत्वात्
॥ रूपवदित्यनुमानं मानं॥ परमाणुकादावनैकांतिकत्ववारणाय जातीयेति॥ अन्यत्स्पष्टं॥ आकाशस्य पृथिव्यादिवदनेकत्वे मानाभावादाह॥ तच्चैके
मिति॥ सत्त्वर्थेन चाकाशस्यैकत्वे घटाकाशो मठाकाश इति व्यपदेशः॥ कथमिति वाच्यं॥ घटादिरूपोपाधिभेदेन तादृशः॥ व्यपदेशात् सर्वत्र

शब्दोपलंभादाकाशस्य विभुत्वमावश्यकमिति॥ प्रतीति विभिन्निति॥ आकाशस्य विभुत्वादिवत्सत्त्वं॥ सत्त्वस्तीत्याह॥ नित्यं चेति॥ न त्वात्मन आकाशः॥ संभू
त इति वेदेनाकाशस्य जन्यत्वप्रतिपादनात्॥ कथं तन्नित्यत्वं॥ यज्जन्यं तदनित्यमिति व्याप्तेरिति चेन्न॥ संभूत इत्यस्याभिव्यक्त इत्यर्थकत्वात्॥ आकाशस्य शरी
रं नो वर्त्तते॥ परं त्विंद्रियमस्ति॥ तच्च श्रोत्रं॥ शब्दग्राहकमिंद्रियं श्रोत्रं॥ श्रोत्रेंद्रियस्याकाशत्वं कथमिति चेन्न॥ यदिंद्रियं रूपादिषु पंचसु मध्ये यं गुणं गृह्णाति
॥ तदिंद्रियं तद्गुणयुक्तमिति नियमाच्छ्रोत्रस्य शब्दग्राहकत्वेन तत्राकाशत्वस्याबाधितत्वात्॥ अपसति कुड्ये सर्वं चित्रमिति न्यायेन सर्वमिदं॥ तदेव संभव
ति॥ यदींद्रियं स्यात्तत्रैव मानं न लभामहे॥ इति चेन्न॥ या या क्रिया सा सा करणसाध्या इति व्याप्तेः॥ वास्यादिरूपकरणसाध्यछिदिक्रियादौ दृष्टत्वेन गंधाद्युपलं
भः करणसाध्यः क्रियात्वात्॥ छिदिक्रियावदित्यनुमानात् तादृशकरणत्वेनेंद्रियस्य सिद्धेः॥ इत्याकाशग्रंथः॥ कालं लक्षयति॥ अतीतेति॥ अतीत इत्यादिर्यो व्यवहा
रः अतीतः॥ भविष्यद्वर्त्तमान इत्यात्मकस्तस्यासाधारणहेतुः॥ काल इत्यर्थः॥ ननु रुदं लक्षणमाकाशे तिव्याप्तं॥ व्यवहारस्य शब्दात्मकत्वादिति॥ चेन्न॥ अत्र
हेतुपदेन निमित्तहेतोर्विवक्षितत्वात्॥ अथेदं लक्षणं कथं महाकाले अतीत इत्यादिव्यवहारस्य रविक्रियादिरूपखंडकाल॥ नियम्यत्वादिति॥ मैवं मरणाम
हाकालेप्युपाधिभेदेन तादृशव्यवहारभेदसंभवात्॥ अतीतत्वं च वर्त्तमानध्वंसप्रतियोगित्वं॥ भविष्यत्वं च वर्त्तमानप्रागभावप्रतियोगित्वं॥ वर्त्तमानत्वं च तादृशामा
नोपाधिसंबंधित्वं॥ महाकालेऽतीतत्वादिकं दर्शितप्रायमित्यलमतिकठिनविषमकांतारप्रदर्शनेन॥ शास्त्रज्ञानां॥ अथ काले किं प्रमाणमिति चेन्न॥ संबंध
व्रतकासापेक्षो॥ साक्षात्संबंधाभावे सति॥ विशिष्टज्ञानत्वात्॥ लोहितस्फटिक इति॥ ज्ञानवदित्यनुमानेन तादृशसंबंधघटकविधयाकालसिद्धेः

त० ति॥तादृशसंबंधश्च॥स्वसमवायिसंयुक्तसंयोगः॥सचजगदाधारः॥कार्य्यमात्रेनिमित्तकरणंचेतिभणितमेवप्राक्॥तस्यजगदाधारत्वे॥कार्यमात्रं॥प्रति
सि०टी० निमित्तकारणत्वेच॥कालः॥कार्य्यमात्रेनिमित्तकरणंचेतिप्रतीतिरेवमानं॥क्षणदिनमासादिव्यवहारस्योपाधिभेदानुविधायित्वात्॥कालस्यैकत्वं॥निरु
१० पाधमितिसंधत्ते॥सचेति॥सर्वत्रकार्योत्पत्तेर्विभुत्वमप्येष्टव्यमित्यभिधत्ते॥विभुरिति॥विभुत्वादेवनित्यत्वं॥संपद्यतइत्याचष्टेनित्यश्चेति॥इतिकालग्रं
थः॥दिशंलक्षयति॥प्राच्यादीति॥इयंप्राचीयमवाचीयं॥प्रतीचीयमुदीचीत्यादि॥व्यवहारासाधारणंकारणंदिगित्यर्थः॥ननुदिशिकिंमानमिति॥चे
दनुमानंतत्॥अथप्रतिज्ञामात्रेणनार्थसिद्धिरितिचेन्मैवं॥बहुतरमूर्त्तसंयोग॥विशिष्टपिंडज्ञानाद्दैशिकपरत्वोत्पत्तिरितिनिर्विवादंएवंचतज्ज्ञानं॥
विशेषणविशिष्योन्यसंबंधव्यवस्थापेक्षं॥साक्षात्संबंधाभावेसति॥विशिष्टज्ञानत्वादित्यनुमानस्यजागरूकत्वात्॥ससंबंधश्चबहुतरमूर्त्तसं
योगस्य॥स्वसमवायिसंयोगःतेनसंबंधस्तत्कादिकृतिस्थ्यति॥साचजगदाधारा॥निखिलकार्यनिमित्तकारणं॥चेत्यभिहितमेवप्राक्॥निखिलपदा
र्थवती॥इदबुद्धोभवतीत्यादितिरकुशाधीस्तत्रमाननमितिमंतव्यं॥प्राचीत्यादि॥व्यवहारस्योपाधिप्रयोज्यत्वाद्दिगेकैवेतिब्रूते॥साचेतितथाहि॥यस्मादुदया
चलसन्निकृष्टं॥यन्मूर्त्तंतत्तस्यप्रतीची॥यथागयायाः॥पाटलीपुरस्यवाकाञ्ची॥यस्मात्कनकाचलसन्निकृष्टं॥यन्मूर्त्तंतत्तस्यादुदीची॥यथारामेश्वरक्षे राम० १०
त्रस्यकाशी॥यस्मात्कनकाचलविप्रकृष्टंयन्मूर्त्तं॥तत्तस्यावाची॥यथाकाश्यारामेश्वरक्षेत्रं॥एवंखंडांतरेपि॥तदुक्तंसर्वेषामेववर्षाणांमे
रुरुत्तरतःस्थितइति॥एवंमहादिशि॥इममेवोपाधिमादायतादृशव्यवहारोबोध्यः॥जन्यमात्रंक्रियामात्रंवाकोपाधिः॥मूर्त्तमात्रंदिगुपाधिरिति

इयं॥इतिदिग्ग्रंथः॥आत्मानंनिरूपयति॥ज्ञानाधिकरणमितिसमवायेन॥ज्ञानाधिकरणमित्यर्थः॥तेनकालेनातिव्याप्तिः॥आत्मानंविभजतेस
इति॥परमात्मेति॥परमत्वंचोत्कृष्टत्वंतच्चप्रकृतेसृष्टिस्थितिप्रलयकर्तृत्वं॥परमात्मजीव॥योवैसर्वज्ञएषमभिधत्ते॥तत्रेति॥परमात्मजीवयोर्मध्येपरमात्मा
ईश्वरःसर्वज्ञश्चभवति॥सत्वेकएवेत्यर्थः॥नित्यज्ञानाधिकरणं॥तल्लक्षणमवगंतव्यं॥अथेश्वरेकथंनित्यज्ञानमितिचेत्॥स्वर्गाद्यसर्गे॥परमाणुनाद्व्यणुकंक
रिष्यामीतिज्ञानस्यावश्यकत्वेनतदुत्पादकशरीरादिकारणकलापस्य॥तदानीमतिरेकेणानस्यनित्यत्वसमुररीकुर्मः॥इत्यमीश्वरेच्छाकृत्योरपि॥अत्रचार्वाकाः
॥ईश्वरसद्भावेमानाभावः॥नचचक्षुर्ग्राह्यंप्रत्यक्षंप्रमाणमिति॥तार्किकाणांमते॥तस्यनीरूपस्पर्शद्रव्यत्वेनबाह्यप्रत्यक्षासंभवात्॥ताभ्यांतरमपिमनसापरात्मप्र
त्यक्षासंभवात्॥नाप्यनुमानंईश्वरनिरूपितव्याप्तेरप्रसिद्धेः॥नचद्यावाभूमीजनयन्देवएकोविश्वस्यकर्त्ताभुवनस्यगोप्तेत्यादिवेदः॥प्रमाणमिति॥ईश्वरोकृता
॥देवतस्यप्रामाण्यसंभवेनेश्वराभावेतस्याप्यप्रमाणत्वादित्याहुः॥तदसत्॥यत्रकार्यत्वं॥तत्रकर्तृजन्यत्वमितिव्याप्तेः॥प्रसिद्धत्वेनांकुरादिरूपंकार्यं॥कर्तृ
जन्यं॥कार्यत्वाद्घटवदित्यनुमानेनकर्तृजन्यत्वेसाधनीये॥तत्कर्तृत्वेनेश्वरसिद्धः॥नचविनाकर्त्तारंधरणीसलिलसंयोगादिभिरेवांकुरादीनामुत्पत्तिरितिशंक्यं॥
घटादीनामपितथात्वापत्तेः॥तदुक्तं॥जगतांयदिनोकर्त्ताकुलालेनविनाघटः॥चित्रकारंविनाचित्रं॥स्वतएवभवेत्तदेति॥किंचनियंतुरभावेग्रहाणांविपरीतोद
यापत्तिः॥एवंजलधरपटलेनकालेवृष्ट्यनुत्पादापत्तिः॥सचेतनमंतरेणाचेतनस्यनियमितकाले॥गमनागमनासंभवात्॥तस्माज्जगत्कर्त्ताकश्चना
वश्यकः॥सएवास्माकमीश्वरः॥कर्तृत्वंचकृतिमत्वंउपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्वंनोकर्तृत्वंनगौरवात्॥केचित्तुकार्यमात्रप्रतिजीवेश्व

त० सि०टी० ११ रयोर्न कर्तृत्वेन कारणत्वं ॥ अनेककृतिषु कारणतावच्छेदकत्वे गौरवात् ॥ किं तत्तत्त्वेनैव ॥ एवं सतीश्वरसाधारणात्मत्वे जातिरपि सिध्यति ॥ एतेन सुखादिसमवायि
कारणतावच्छेदकतया नेश्वरसाधारणात्मत्वसिध्यतीति पक्षादरणेपि न क्षतिः ॥ अथ कथमीश्वरसाधकानुमानमिति चेत् ॥ अंकुरादिकमात्मजन्यं कार्यत्वाद्घटव
दिति ॥ बिभावयामासुः ॥ मीमांसकास्तु मैवेश्वरः ॥ मंत्रमयी देवता अर्थवादत्वे दोषेन प्रमाणमिति गदंति ॥ मीमांसकैकदेशिनस्तु ॥ कर्मातिरिक्त एवेश्वर इति ॥ सम्मू
चिरे ॥ इतीश्वरवादः ॥ नन्वीश्वरः ॥ किं शरीरी उत तद्रहितः ॥ नाद्यः ॥ तच्छरीरस्य महत्त्वे ॥ कुरंबरफलादौ ॥ मशकविशेषोत्पत्तिर्न स्यात् ॥ तत्र ॥ तस्य प्रवेशासंभवा
न्मध्यमपरिमाणत्वे ऽनित्यत्वप्रसंगात् ॥ देशांतरे कार्यानुत्पत्तिप्रसंगाच्च ॥ अणुत्वे दूषणं दरीदृश्यत एव ॥ नान्त्यः ॥ शरीराभावे कर्तृत्वस्यैवासंभवादिति ॥ चेत्र ॥
शरीरवत एव कर्तृत्वे मानाभावात् ॥ शरीरमंतरेणैवेश्वरेण मंत्रादिवत् ॥ कार्योत्पादनात् ॥ ईश्वरस्य परमाण्व ॥ एवं शरीरमिति केचित् ॥ आकाशशरीरं
ब्रह्मेति ॥ श्रुतेराकाशमेव तदित्यपरे ॥ अन्ये तु संसारिणां ॥ मदृष्टवशादीश्वरस्य शरीरमिति ॥ ब्रुवंति ॥ परे तु भक्ता ॥ वेशात्पाये नेश्वरस्य ॥ शरीरमिति ॥
मेनिरे ॥ अत्राहुः ॥ ईश्वरः शरीररहित एवं ॥ परंतु तत्तज्ज्ञानस्याप्यपरमपुरुषार्थप्रदप्रणालिकामूर्तीभूतोपासनादिभिः ॥ संसारपंकनिमग्नाज्ञातिजनो राम०
द्धिधार्षुर्लीलाविग्रहं दधाति ॥ सच ॥ शिवशक्तिगणेशार्कविष्णूनां ब्रह्मणश्च ॥ तदुक्तं ॥ शिवशक्तिगणेशार्कविष्णुरूपात्स ईश्वरः ॥ उपासनानुसारेण भक्ते ११
भ्यो भुक्तिमुक्तिद इति ॥ अत्र वैष्णवाः ॥ शिवादीनां नेश्वरत्वं ॥ शिवस्तु विष्णोरुपासकः ॥ नामसत्वात्रोपास्यश्च शक्तिस्तु तदीयमाया ब्रह्मादयस्तु ॥ तदाज्ञानु
वर्तिनः ॥ यो लक्ष्मीनिवासः ॥ तत्साम्यं कुतः शिवस्य श्मशानवासिनः ॥ सुतरां शक्त्यादीनां किंच ॥ विष्णुव्यतिरिक्तानामुपासनैव निषिद्धा ॥ तदुक्तं ॥ वासुदे

वं परित्यज्य य उपास्ते न्यदेवतं ॥ तृषितो जाह्नवीतीरे कूपं खनति दुर्मतिः ॥ रिति स्माहुः ॥ अत्र शैवाः ॥ श्रीमच्छिवस्य करालजेशमात्रमाश्रित्य महापदवीं प्राप्नवंतां ॥ वि
ष्ण्वादीनां कुत ईश्वरत्वं ॥ विष्णुस्तु शिवस्योपासकः ॥ अत एव स्वनेत्रमर्पयित्वा चक्री पुंडरीकाक्ष इति नामलब्धवानाराधनांतरेण ॥ लक्ष्मीवैकुंठं च ॥ अत एवाद्यापि रा
मेण पूजितो रामनाथः ॥ सेतौ प्रत्यक्षसिद्धः ॥ नच तर्हि कथं विष्णुचरणोदकं ॥ बिभर्ति हर इति ॥ तच्च भक्तपराधीनत्वात् ॥ अत एवेश्वरः ॥ परमेश्वर इत्ययमेवब
ह्रियते शक्तिरस्यैव मायापः ॥ शुद्धस्फटिकसंकाशः ॥ सूर्यचंद्राग्निलोचनः ॥ लीलानाट्यसूत्रधारः ॥ क्वचिद्वीररूपः ॥ क्वचित्सौम्यरूपः क्वचित्श्म
शानवासी ॥ क्वचिदनेकदेवगणसमाश्रितानुपमकैलासशिवलोकादिवासी ॥ तस्य शिवस्य साम्यं कुतो विष्ण्वादीनां कुतो वा ॥ उपास्यत्वं तामसत्वं यदुक्तं
तत्तु छद्मरूपावतारस्याभिन्नत्वात् ॥ श्मशानवासित्वेन नैकृष्ट्यं यद्दर्शितं ॥ तदपि न तस्य स्वतंत्रत्वात् ॥ तदुक्तं ॥ अनंतरूपस्य शिवस्य लीलया विहारशी
लस्य विचित्रकर्मणः ॥ अनेकरूपेण च भीषणेन ॥ तत्स्वरूपहानिर्न भवेत्कदाचन ॥ सुखं वा कुतस्तस्य दुःखं कुतो वा ॥ कुतः सुंदरत्वं ॥ कुतोऽसुंदरत्वं ॥ अने
कैः स्वरूपैरनेकैः प्रकारैः सदा लीलया खेलतश्चिन्मयस्येति ॥ किंच शिवातिरिक्तदेवानामुपासनैव निषिद्धा ॥ तदुक्तं ॥ महादेवं परित्यज्य य उपास्ते न्यदैव
तं ॥ समूढो विषमश्नाति ॥ सुधां त्यक्त्वा क्षुधातुरः ॥ इतीति गायंति ॥ अत्र शाक्तिकाः ॥ किं भो यया शक्त्या ॥ ब्रह्मविष्णुमहेशा निर्मिताः ॥ यत्कृपामवलंब्य ब्र
ह्मादयः ॥ सृष्ट्यादिकं रचयंति ॥ तत्साम्यमपि प्राप्तुं नार्हंति ॥ तेत्र ये देवाः ॥ कुतो वा तदधीनत्वं ॥ तस्याः परदेवतात्वादिति गदितमज्ञानता ॥ इति समूचिरे ॥ ए
वं गाणपत्यादयस्तत्तदौत्कृष्ट्यं ॥ वर्णयामासुः ॥ अत्र स्मार्तपौराणिकादयः ॥ एतेषां मोहः कथं वा भवेत् ॥ तदुक्तं ॥ शिवस्य हृदयं विष्णुर्विष्णोश्च हृदयं शिव

त० ॥इति एवमत्र वेदेप्याह॥ स ब्रह्म स शिवः स हरिः सेंद्रः सोऽक्षरः परमः स्वराडिति॥१॥ तदुक्तं॥ मत्स्यपुराणे पद्मपुराणे युक्ताः॥ सांगाश्च वेदाः स्मृतयः समस्ताः॥ शास्त्रा
सि० टी० णि सर्वाणि विलोकितानि॥ न क्वापि दृष्टः शिवविष्णुभेद इति॥ तत्तद्देवताप्रस्तावे॥ तत्तद्देवतामुख्य॥ कर्तृकर्मादिप्रदर्शनं तु॥ कल्पभेदाभिप्रायकं॥ अत एव
१२ शक्त्यादीनामपि ताभ्यामभेदः॥ तदुक्तं॥ शैवाः शाक्ताश्च गाणेशाः॥ सौरा विष्णुप्रपूजकाः॥ विद्विषंति मिथो भ्रांत्या॥ तेषां मुक्तिस्तु निष्फला॥ सिद्धांतावद
वः प्रोक्ताः कृतानानाप्रयोजनैः॥ परं तस्याभिप्रायमज्ञात्वा नातिविरलः कृती॥ अनेककार्यसिद्ध्यर्थं नूपं बहुविधं विष्णोः तदेकार्यज्ञानतो मूढैस्तत्स्वाखंडं
प्रतिष्ठितमिति॥ अतः कूपमंडूकन्यायेन लोकाः ज्ञानशून्या भवंतीति जगदुः॥ इति सशरीरेश्वरवादः॥ जीव इति॥ तत्रेत्यभिसंबध्यते॥ बंधमोक्षयोग्योऽज्ञी
व॥ नन्वस्य ज्ञानाधिकरणं वाच्यमेव क्षेत्रज्ञत्वमुच्यते॥ प्रतिशरीरं भिन्न इति॥ सुखदुःखादिवैचित्र्यादिति हेतुः पूरणी जीवस्यैकत्वे सर्वशरीरस्यापि सुखाद्यु
पलब्धिप्रसंगः॥ मध्यमपरिमाणत्वेऽनित्यत्वापत्त्या कृतहानाकृताभ्यागमप्रसंग॥ इत्यभिप्रायवानाह॥ विभुरिति॥ विभुत्वान्नित्यत्वमर्थादायातमित्याह॥
नित्यश्चेति॥ ननु जीवसद्भावे किं मानमिति॥ चेन्न॥ अहं सुखमहं दुःखीति मानसप्रत्यक्षस्य मानत्वात्॥ ननु विप्रतिपन्नं॥ प्र[illegible]तिकूपं प्रत्यक्षं॥ सुपन्यस्तं श राम
ब्दमिति चेत्तत्रानुमानमेव मानं॥ तथाहि बुध्यादयः॥ पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रिताः॥ पृथिव्याद्यष्टद्रव्यानाश्रितत्वे सति गुणत्वात्॥ यो यदनाश्रि १२
तो गुणः॥ स तदतिरिक्तद्रव्याश्रितः॥ यथा पृथिव्याद्यनाश्रितः॥ शब्द इत्यनुमानेन नवमं द्रव्यमात्मा सिध्यति॥ न च वक्तव्यं॥ ते भूतानां गुणा भवंत्विति
॥तथा सति॥ तेषामाभ्यंतरप्रत्यक्षानुपपत्तेः॥ भूतगुणानां रूपादीनां॥ बाह्यप्रत्यक्षस्यैवानुभवसिद्धत्वात्॥ अत एव भूतत्वं॥ बहिरिंद्रियग्राह्य॥

विशेषगुणवत्त्वमिति संगच्छते॥ विशेषगुणत्वादेव न दिक्कालमनसां गुणाः॥ नन्वविशेषगुणत्व॥ एवमाने न लभामहे॥ इति चेत्॥ बुध्यादयो विशेष
गुणाः॥ एकैकेंद्रियग्राह्यत्वे सति॥ गुणत्वाद्रूपवदित्यनुमानं मानं॥ एवमिंद्रियं सकर्तृकं करणत्वात्॥ कुठारवदित्यनुमानेनाप्यात्मा सिध्यति॥ अत्र
बौद्धपि नास्तिकाः॥ क्रमशः शंकंते स्म॥ तत्रादौ शून्यवादिनो माध्यमिकाः॥ सुषुप्त्यवस्थावहितोत्तरक्षणे॥ उत्थितस्य सुषुप्तावहं॥ नासमित्यनुभवाच्छून्य
मेवात्मा॥ अत एव सर्वमिदं मिथ्यैव तत्र श्रुतिरप्याह॥ असदेवेदमग्र॥ आसीदितीत्याहुः॥ तदसत्॥ सुषुप्त्यावहं ना समित्यनुभवस्याप्रामाणि
कत्वात्प्रामाणिकत्वे तात्मनि॥ तस्य ज्ञानाभावोपरक्तत्वात्॥ यन्मिथ्येदमित्युक्तं॥ तदपि न सत्॥ प्रत्यक्षतोऽनुभूयमानपदार्थस्यापशक्त्यापलापत्वात्॥ उप
दर्शितवेसगतिर्वक्ष्यते॥ क्षणिकविज्ञानवादिनो योगाचार्यास्तु॥ क्षणिकविज्ञानमेवात्मा॥ तद्द्विविधं॥ प्रवृत्तिविज्ञानमालयविज्ञानं च॥ तत्रायं घ
ट इत्यादिप्रवृत्तिविज्ञानं॥ सुषुप्त्यावहमित्यालयविज्ञानं सुखादिकमस्यैव विकारः॥ तदतिरिक्तवस्तुन एवाप्रसिद्धेः॥ अत्र श्रुतिरप्याह॥ अन्योंतरा
त्माविज्ञानमय इतीत्याहुः॥ तदप्यसत्॥ पूर्वानुभूतपदार्थस्मरणानुपपत्तेः॥ अनुभवितुरिदानीमभावात्॥ अन्यानुभूतेर्थेऽन्यस्यानुसंधानायो
गात्॥ ननु कस्तूरीसुरभिपटवत्॥ पूर्वपूर्वविज्ञानोत्पादितसंस्कारात् उत्तरोत्तरविज्ञाने संक्रांतत्वमिच्छाम॥ इति माध्यमिकाः॥ तथा स
ति जननयिमनुभूतपदार्थस्य गर्भस्यात्मजेन स्मरणप्रसंगे इत्याद्यन्यत्र विस्तरः॥ सौत्रांतिकास्तु ज्ञानाकारानुमेयक्षणिकबाह्यार्थ एवात्मेत्य
भिजल्पंति॥ क्षणभंगुरवादिनो॥ वैभाषिकास्तु॥ क्षणिकबाह्यार्थ एवात्मेतीच्छंति॥ तदुभयमपि तुच्छं॥ ज्वरादीनां तथात्वे मानाभावात्॥

ने० एते चत्वारो नास्तिकाः॥ बौद्ध इत्यप्युच्यंते॥ बौधानां चाष्टादशभेदाः प्रसिद्धाः॥ उपभेदाश्च बहवः ते च विस्तरभियेह नोक्ताः॥ चार्वाकास्तु ब्राह्मणोहं॥
सि॰ टी॰ गौरोहं स्थूलोहं॥ अहं सुखी चाहं सुखी॥ अहं जानामीत्यादि॥ सामानाधिकरण्यप्रतीतेः॥ ब्राह्मणत्वादिधर्मवति शरीर एव ज्ञानसुखाद्याश्रयत्वसिद्धि
१३ तीति॥ शरीरमेवात्मा॥ अत्र श्रुतिरप्याह॥ स वा एष पुरुषोन्नरसमय इति॥ ननु शरीरस्य पार्थिवत्वेन घटादिवन्नचेतनत्वं तदिति मेवमस्याः केवलना
गवल्लीदलस्य॥ रागानुत्पादकत्वेपि॥ नागवल्लीदलखदिरचूर्णक्रमुकसमुदायात्मकतांबूलस्य रागोत्पादकत्ववत् केवलपार्थिवस्याचेतन
त्वेपि भूतचतुष्टयसमुदायात्मकशरीरस्य तथात्वे बाधकाभाव इत्याहुः॥ तत्र मृतशरीरे ज्ञानापत्तेः॥ ननु ज्ञानं प्रति प्राणस्यापि कारणत्वेन
॥ तदानीं तदभावान्न॥ न उत्पत्तिः॥ इतरथा नैयायिकानां नये॥ आत्मनो विभुत्वेन॥ मृतशरीरे ज्ञानापत्तिवारणं दुर्धीवाणगुरूणामप्यशक्य
मित्यतिचेन्न॥ अवयवोपचयापचये शरीरस्य नानात्वेन पूर्वदूषणावतारात्॥ पुनः श्रूयतां॥ विद्वत्त्वनृपत्वमूर्खत्वदरिद्रत्वादि नियार्कं भवंतः॥ किं
ब्रुवंते संसारस्य स्वभाव एवेदं॥ सर्वमिति॥ वेदे दृष्टे परीत्ये किं बाधकं॥ वस्तुजन्मसमय एवेति चेन्न हि॥ तस्मिन्नेव समये जन्म न तु समयांतर इत्यत्रे राम०
व किं नियामकं॥ अस्त्वीश्वर एव भवन्मते॥ नियामक॥ इति वक्तुमशक्यं॥ तस्य समदर्शिकत्वात्॥ तस्माद् दृष्टमेव नियामकमिति वाच्यं॥ तत्रा १३
त्मानमंतरेणानुपपन्नमिति शरीरातिरिक्त एवात्माभ्युपेयः॥ चार्वाकैकदेशिनस्तु काणोहं बधिरोहमहं जानामीति॥ सामानाधिकरण्यदर्श
नादिंद्रियमेवात्मेत्याहुः॥ तत्र बालप्रलपितं चक्षुरादिनाशे योहं द्रष्टमद्राक्षं॥ सोहमिदानीं स्पृशामीत्यभेदप्रतीत्यनुपपत्तेः॥ अपरे चार्वा

कास्तु॥ सुषुप्तिदशायां चक्षुरादीनामुपरमेपि मनसा सर्वव्यवहारदर्शनात्॥ तस्य नित्यत्वाच्च मन एवात्मा॥ अत्र श्रुतिरप्याह॥ अन्योंतरात्मा मनोम
य इतीमन्यंते॥ तदप्यसत्॥ मनसोणुत्वेन॥ सुखाद्यनुपलंभप्रसंगात्॥ इतरे चार्वाकास्तु॥ प्राणेन विना व्यवहारादर्शनात्॥ प्राण एवात्मा॥ अत्र
श्रुतिरप्याह॥ अन्योंतरात्मा प्राणमय॥ इतीति कथयंति॥ तदपि न युक्तं॥ तस्यानित्यत्वेन तदुरस्तु॥ प्रदर्शितदूषणगणबाणप्रहारपातात्॥ पुत्रे
पुष्टेऽहमेव पुष्टः॥ पुत्रे नष्टे अहमेव नष्ट इत्यनुभवात्॥ आत्मा वै जायते पुत्र॥ इति श्रुतेश्च पुत्र एवात्मेत्यपि कश्चित्॥ तदपि न॥ तादृशानुभवस्या
भिमानत्वा॥ उपदर्शितश्रुतीनामात्मनो ज्ञानाधिकरणत्वप्रतिपादकस्तसंज्ञानमिति॥ दृश्यमानश्रुतिबाध्यत्वात्॥ पूर्वपक्षे तात्पर्यं दिगं
बरास्तु देहातिरिक्तदेहपरिमाण आत्मा स च दीपप्रभावत्संकोचविकाशशालीत्याहुः॥ तदप्यकिंचित्करं तस्यानित्यत्वापत्त्या॥ तच्छिरसि
पूर्वोक्तदोषवज्रप्रहारपातात्॥ एत एव क्षपणका जैना इत्युप्युच्यंते॥ इति संक्षेपः॥ इति नास्तिकमतषंडनं॥ अथ सांख्यशास्त्रज्ञा॥ आ
त्ममूलप्रकृतिमहदहंकार॥ पंचतन्मात्रषोडशविकारभेदात्॥ पंचविंशतितत्त्वानि॥ तत्र श्रीकरनिर्जितघ्नतामरसपञ्जाशवकर्तृत्व॥ भो
क्तृत्वादिनिर्लिप्त आत्मा॥ चेतनश्च॥ मूलप्रकृतिस्तु जगत्॥ कर्त्री॥ नित्या जडा च॥ महत्तत्त्वं च॥ प्रकृतेः परिणामः॥ प्रकृतिकार्यमिति
यावत्॥ अहंकारश्चाहं सुखी॥ अहं दुःखीत्याद्यभिमानः॥ अहं च महत्तत्त्वस्य कार्यं॥ तन्मात्रं च शब्दस्पर्शरूपरसगंधाः॥ एते च अहंकारस्य
कार्याणि॥ महदादयश्चैते सप्त प्रकृतयो॥ विकृतयश्च॥ विकारास्तु॥ श्रोत्रत्वक्चक्षुरसनघ्राणानि पंच ज्ञानेंद्रियाणि॥ वाक्पाणिपादो

त० पस्थ्यायपवः पंचकर्मेंद्रियाणि ॥ मनश्चाकाशवायुतेजोजलपृथिव्यः ॥ पंचभूतानीति षोडशसंख्याकाः तैर्महाभूतैः शरीरमुत्पाद्यते ॥ तत्संबं
सि०टी० धवशात् ॥ प्रकृतिरेव सर्वं करोति ॥ तत्संसर्गवशादात्मनोहं करोमीत्यभिमानो जायत इत्याहुः ॥ तदसत् ॥ अहं कर्त्ताहं भोक्ताहं ॥ ज्ञातामी
१५ ति ॥ कर्तृत्व ॥ भोक्तृत्व ॥ चैतन्यादीनां ॥ सामानाधिकरण्यप्रतीतेः ॥ चेतनातिरिक्तप्रकृति ॥ सद्भावे मानाभावात् ॥ जडायाः प्रकृतेः ॥ कर्तृत्वा
संभवाच्च ॥ इति कृतं पल्लवितेन ॥ इति सांख्यमतनिरूपणं पातंजलशास्त्रं त्वास्तु ॥ आत्मा योगगम्यः ॥ योगश्च चित्तवृत्तिनिरोधनं ॥ तच्च
चित्तस्य बाह्यविषयनिवर्त्तनादंतरंभिति वेशः ॥ यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिभेदादष्टौ योगांगानि ॥ त
त्रस्तेयमकर्म्मनिवृत्तिकरणं नवशांति शौचं धृतिमिताहार सत्यभाषणं ॥ जीवहिंसन ब्रह्मचर्यभेदाद्दशयमाः ॥ आस्तिकत्वदर्षतपः
॥ सुराचनिदानलज्जा ॥ सद्दानहोमस्तवणजपभेदाद्दश नियमाः ॥ पद्मासनस्वस्तिकभद्रवज्रवीरासनभेदात्पंचमुख्यासनानि ॥ पूरककुंभ
करेचककुंभभेदात्प्राणायामस्त्रिविधः ॥ इंद्रियाणां विषयनिवर्त्तनं प्रत्याहारः ॥ अंगुष्ठादिब्रह्मरंध्रांतं ॥ तत्तत्स्थाने प्राणधारणं धार राम०
णा ॥ ततो हृदयारविंदे शिवस्य विभावनं ध्यानं ॥ ततः प्राणनिरुध्यात्मनासदृशावस्थैकाभावनं समाधिः ॥ एतादृशांगसहितयोगेन १७
शिवमयं ॥ ज्योतिरवलोकते ॥ इदमेव समाधेः ॥ सिद्धिरित्युच्यते ॥ तदुक्तं चित्तस्याधिकसाधितस्य तु वहिर्वृत्तेर्निरोधक्रमादंतर्वृत्ति
तयांगरेवाविगलत्पीयूषमास्वादयेत् ॥ स्वात्मन्येव सदा सदाशिवमयं ॥ तज्ज्योतिरालोकयेत् ॥ सांद्रानंदपरंपरामनुभवेत् ॥ सिद्धि ॥ सामा

धेरियमितीत्याहुः ॥ इति पातंजलमतनिरूपणं वेदांतिनस्तु ॥ एकमेवाद्वितीयं ब्रह्मेत्यादिश्रुतेरेकं ॥ ब्रह्मैवास्ति ॥ तच्चाविनाशावारेयमात्मा सत्यं
ज्ञानमनंतं ब्रह्मेति श्रुतेर्नित्यं विज्ञानस्वरूपं च ॥ तदैवैकोहं ॥ बहुस्यामिति श्रुतेरुपाधिवशाज्जीव ॥ इत्युच्यते ॥ तस्यैव विद्याविद्याविद्यास्यां ॥ बंधमोक्षौ
भवतः ॥ शरीरेष्वात्मत्वाभिमानोकारयित्र ॥ विद्याविद्यानुतत्त्वनिवर्त्तिका ॥ तस्मिन्नेव ब्रह्मणि रज्जौ ॥ सर्प इव मिथ्याभूतसंसारो भासते तस्माद्ब्र
ह्मैव सत्यं ॥ जगन्मिथ्येत्याहुः ॥ इदमपि युक्तं ॥ न प्रतिभाति ॥ प्रत्यक्षसिद्धपदार्थस्य मिथ्यात्वासंभवात् ॥ न च रज्जौ तर्हि कथं ॥ सर्पस्य मिथ्यात्वमि
ति वाच्यं ॥ प्रसिद्धस्यैव सर्पस्य ॥ तत्र भानांगीकारेण दृष्टांतवैषम्यात् ॥ न च तत्राप्यसदेव सर्प्पावभासत इति वाच्यं ॥ तथा सति शशशृंगस्यापि भा
नापत्तेः ॥ अथ तर्हि स्वप्ने कथं शस्त्रप्रहारादेर्मिथ्यात्वमिति मा भाविष्टाः ॥ प्रसिद्धस्यैव शस्त्रप्रहारादेः ॥ स्वस्मिन्नारोपमात्रात् ॥ अत एव स्वप्नो
मानसविपर्यय इति वक्ष्यामः ॥ न च मिथ्यात्वप्रतिपादकश्रुतेरप्रामाण्यापत्तिरिति वाच्यं ॥ तस्यानन्यभावस्य नश्वरत्वप्रतिपादनेतोत्पयात् ॥
च तस्य वेदस्यापि मिथ्यात्वापत्त्यात् ॥ प्रतिपाद्यब्रह्मणोपि ॥ तथात्वापत्त्या नास्तिकमतप्रवेशप्रसंगः ॥ यन्नित्यविज्ञानं ॥ ब्रह्मेत्युक्तं ॥ तदपि
न तस्य दुरूपपादकत्वात् ॥ तथा हि ॥ किमात्ममात्रं नित्यविज्ञानस्वरूपं ॥ उत जीवः ॥ किमुतेश्वरः ॥ नाद्यः ॥ यद्यज्ज्ञानं ॥ तत्तत्सविषयकमिति नि
यमात् ॥ तस्याधिकश्चन विषयो वाच्यः ॥ स किं यावज्जगदिति ब्रूषे ॥ किं वा यत्किंचित्घटपटादि ॥ नाद्यः ॥ सर्वविदीनामपि यावदंतर्गतत्वेन सर्वमद्वि
षयः ॥ इत्यनुभवापत्तेः ॥ न च वक्तव्यं ॥ निर्विषयकमेव तदुररीक्रियत इति ॥ निर्विषयकस्य ज्ञानत्वे मानाभावात् ॥ न द्वितीयः ॥ घटस्तद्विषयः

त॰ परस्तद्विषयो वेत्यत्र ॥ विनिगमनाविरहे ऽभक्षितेपि लशुने न शांतिर्व्याधिरिति न्यायेन ॥ तद्दोषतादवस्थ्यात् ॥ विनिगमनाच्च एकत्र पक्षपाति
सि॰टि॰ नी युक्तिः ॥ जीवस्य नित्यविज्ञानस्वरूपत्वे ॥ उपदर्शितदोषवारणं ॥ चतुर्मुखब्रह्मणोप्यशक्यं ॥ प्रमाणाभावश्च ॥ नचेश्वरस्यापि नित्यविज्ञान
१५ स्वरूपत्वं संभवति ॥ सत्यं ज्ञानमित्यस्य ॥ वेदोनीलरूपत्वस्येव ज्ञानगुणवदिति ॥ तदर्थत्वात् ॥ अतएव यः सर्वज्ञः ॥ स सर्वविदिति श्रुतेः ॥ प्रामाण्यं
निर्वहति ॥ जीवब्रह्मणोरैक्यमिति यदुक्तं ॥ तदपि न सुखदुःखादिवैचित्र्यात् जीवानामनेकत्वेन ॥ तेनैकत्वासंभवात् ॥ अहं जीवानेश्वर इति प्रतीतेश्च ॥
अतएव कश्चन संसारी बद्धः ॥ कश्चन संसारी मुक्त इति व्यवहार उपपद्यते न त्वेवं संति ॥ सर्वं खल्विदं ब्रह्मेति श्रुतिविरोध इति चेन्न ॥ ब्रह्मेत्यस्य
ब्रह्मव्याप्तमित्यर्थकत्वात् ॥ व्याप्तत्वं च संबद्धत्वं ॥ अन्यथा घटादीनामपि ब्रह्मत्वापत्त्या ब्रह्मणो ऽनित्यत्वापत्तिः ॥ जडत्वापत्तिश्च ॥ नचैकोहं ॥ ब
हुस्यामिति श्रुतेरप्रामाण्यप्रसंग इति वाच्यं एकोहं निराकारो ब्रह्मविष्णुरुद्ररूपेण बहुस्यामिति ॥ तदर्थत्वात् ॥ तत्त्वमसि ॥ ब्रह्मविद्ब्रह्मैव भवतीत्या
दिश्रुतेर्जीवेश्वरयोरभेदप्रतिपादकाया ॥ अप्रामाण्यमवलंब्य ॥ तामिति चेन्न ॥ तत्त्वमसीत्यस्य सति दुःखत्वेनः ॥ तत्सादृश्यस्त्वमसीत्यर्थकत्वात् ॥ एवं राम॰
ब्रह्मैव भवतीत्यस्यापि ॥ ऐश्वर्याधिकेन वैश्यो यं राजैवेतिवत् ॥ अतएव ॥ निरंजनः परमं साम्यमुपैतीत्यादिश्रुतिः प्रामाण्यमाप्नोतिसंक्षेपः ॥ इति १५
आत्मनिरूपणम् ॥ मनो निरूपयति ॥ सुखेति ॥ सुखाद्युपलब्धिः सुखदुःखादिसाक्षात्कारस्तस्य साधनं बीजं मन इत्यर्थः ॥ आत्ममनःसंयोग
वारणायेंद्रियमिति ॥ चक्षुरादिवारणाय सुखेत्यादि ॥ एतेन मनसि प्रमाणमपि दर्शितं ॥ तथाहि ॥ सुखादिसाक्षात्कारः करणसाध्यः ॥ जन्यसाक्षा

त्कारत्वात् ॥ चाक्षुषादिवदित्यनुमानेन चक्षुरादीनां बाधात् मनःसिद्ध्यति ॥ मनोविभजते ॥ तच्चेति मनश्चेत्यर्थः ॥ मनसोऽनंतत्वे हेतुमाह ॥ प्रत्यात्मेति ॥ आत्मान
मात्मानं प्रति प्रत्यात्मं त [illegible] स्मिन्नियतत्वान्नियमेन वर्त्तमानत्वादित्यर्थः ॥ तथा चैकैकात्मन एकैकमनस आवश्यकत्वेनात्मनामनंतत्वान्मनसो
प्यनंतत्वमिति भावः ॥ नत्वाकाशादिवन्मनसो विभुत्वे विभुद्वयसंयोगानंगीकारेण ज्ञानोत्पत्तिर्नस्यात् ॥ ज्ञानासमवायिकारणप्रसिद्धेरत आह ॥ प
रमाणुरूपमिति ॥ परमाणुस्वरूपमित्यर्थः ॥ तथा च मनसोऽणुत्वेनात्ममनःसंयोगः ॥ संभवत्येवेति भावः ॥ मीमांसकास्तु मनो विभु स्पर्शरहितद्रव्यत्वा
दाकाशवदित्यनुमानेन विभुत्वं सिद्ध्यति विभुद्वयसंयोगोप्यस्त्येवेत्याहुः ॥ नेतत् ॥ तादृशसंयोगस्य नित्यत्वापत्त्या सर्वदा ज्ञानोत्पत्तिप्रसंगेन सुषुप्त्यभावापत्तेः ॥
ममते तु यदा मनः ॥ पुरीतति प्रविशति तदा सुषुप्तिः ॥ यदा निःसरति तदा ज्ञानोत्पत्तिः ॥ पुरीतद्भिन्नदेशावच्छिन्नात्ममनःसंयोगस्यैव ज्ञानकारणत्वात् ॥ अतएव
सुषुप्तिकाले ज्ञानापत्तिवारणाय ज्ञानमात्रे त्वङ्मनःसंयोगः कारणमिति मतं निराकुर्वंति नव्याः ॥ ननु मनसोऽणुत्वे ऽवधानिनां कथं युगपद्ज्ञानोत्पत्तिः ॥ मन
सः चक्षुरिंद्रियसंयोगकाले त्वगिंद्रियादिना संयोगासंभवादिति चेन्न ॥ मनसोतिलाघवेगशालित्वेन क्षणविलंबेनैवेंद्रियसंबंधसदभ्यासविशेषशास्याष्टाव
धानिनां ज्ञानोत्पादनात् युगपदनुभवामीति प्रत्ययो भ्रमः ॥ अतएव विमुक्तं व्यासंगात् ज्ञानमित्यनुभवोदरीदृश्यते ॥ तथाचन्यायसूत्रं ॥ युगपद्ज्ञानानुत्पत्तिर्मनसो
लिंगमिति ॥ मनसो नित्यत्वे जाववमित्याह ॥ नित्यं चेति ॥ परमाणुरूपत्वाद्धि नित्यं ॥ इति मनोनिरूपणम् ॥ अथ द्रव्याणां साधर्म्यवैधर्म्ये प्रक्रिया ॥ पृथिव्यादिनवा
नां समवायिकारणत्वं साधर्म्यं नित्यद्रव्याणामवृत्तित्वं ॥ पृथिव्यप्तेजोवायुमनसां मूर्त्तत्वं ॥ क्रियावत्त्वं परत्वापरत्ववेगवत्त्वं च ॥ मूर्त्तत्वं च परिच्छिन्नपरिमा

त०
दी० टी०
१७

णीसंबंधाभावे गंधप्रतीत्यभावइत्यन्वयव्यतिरेकाभ्यां पृथिवीगंधस्यैव जलेप्रतीतिर्बोध्या॥एवं वायावपि॥ननु देशांतरस्य कस्तूरीकुसुमसंबद्ध एवनस्यैतद्देशेतत्सं
बंधाभावाद्गंधप्रतीत्यनुपपत्तिः॥न च वाद्यानीततत्परमाणुकादिसंबंधोऽस्तीति वाच्यम्॥कस्तूर्यादीनां न्यूनतापत्तेः॥कुसुमस्य च छिद्रापत्तेरिति चेन्न भोक्तृदृष्टविशे
षेणात्र अणुकांतराद्युत्पत्तेः॥कर्पूरादौतु तदभावान्न तथा॥इति गंधनिरूपणम्॥स्पर्शं निरूपयति॥त्वगिति॥संख्यादिवारणाय मात्रपदम्॥तत्रेति पृथिव्यादि
चतुष्टय इत्यर्थः॥शीत इति॥शीतस्पर्श इत्यर्थः॥एवमुत्तरत्रापि॥इति स्पर्शनिरूपणं प्रसंगाद्रूपादिचतुष्टयस्य पाकजत्वापाकजत्वे प्रतिपादयन्नित्यत्वा॥नि
त्यत्वेप्रतिपादयति रूपादीति॥पाकजमिति पाकजमपीत्यर्थः॥पाकस्तेजःसंयोगस्तस्माज्जायत इति पाकजं॥पाकासमवायिकारणकमिति यावत्॥ननु
कथं पाकात्तज्जन्मेति चेदत्र पीलुपाकवादिनो॥वैशेषिकाः॥आमन्निक्षिप्ते घटे हुताशनसंयोगात्परमाणपर्यंतकपालपर्यंतावयवेषु क्रिया ततः पर
स्परविभागः॥ततः परस्परसंयोगनाशः॥ततोऽसमवायिकारणनाशाद्द्व्यणुकनाशः इति नियमेन श्यामघटस्य नाशे विशिष्टाः परमाणवः॥पच्यंते॥तत्रै
वपाकेन रूपादिचतुष्टयोत्पत्तिस्ततः॥परमेश्वरेणसर्गादाविव द्व्यणुकादिक्रमेण पूर्ववद्रक्तघटो निर्मीयते परमाणुरूपेणैव घणुकरूपेणान्य १७
ते॥एवं क्रमः॥अन्यथा घटस्य दृढतरत्वेन हुताशनप्रवेशासंभवाद्रूपाद्युत्पत्तिर्न स्यादित्याहुः॥पिठरपाकवादिनो नैयायिकास्तु॥घटादिकं सच्छिद्र
मेवा अन्यथा तदंतर्गततंडुलादेः पाको न स्यात्॥अत एकदैव परमाणावादि घटपर्यंतेषु घट[illegible]नाशं विना पाकेनैव रूपाद्युत्पत्तिरिति वदंतीति
संग्रहः॥ननु स्पर्शः॥कथं पाकज इति चेत्तरसालफलादावातपादिना कोमलत्वकठिनत्वस्पर्शोत्पादनस्य प्रत्यक्षसिद्धत्वात्॥केचित्त्ववयवसंयोग

विशेष एव काठिन्यादिरित्याहुः॥तदसत्॥तथासति तस्य चाक्षुषत्वापत्तेः॥स्पर्शनसंयोगस्य चाक्षुषत्वनियमात्॥पाकजत्वादेवानित्यमित्याहानित्यंचेति
अन्यत्र जलादावित्यर्थः॥अपाकजमिति अपाकजमेवेत्यर्थः॥इति पाकवादः॥संख्यां निरूपयति॥एकत्वादीति॥एकत्वमित्यादिर्यो व्यवहारः॥एकत्वं द्वित्वमित्या
द्यात्मकस्तस्य हेतुः संख्यैवेत्यर्थः॥ननु संख्यायाः अवधिरस्ति न वेत्याशंक्याह॥एकत्वादीति॥तथाच॥एकं दश शतं चैव सहस्रमयुतं तथा॥लक्षं च नियुतं चै
व कोटिरर्बुदमेव च॥वृंदं खर्वो निखर्वश्च शंखः पद्मश्च सागरः॥अंत्यं मध्यं परार्द्धं च दशवृद्ध्या यथाक्रममिति महदुक्तेः॥परार्धपर्यंतैव संख्येति भावः॥नि
त्यानित्यत्वभेदेन कतिविधमित्याह॥नित्यगतमिति गगनपरमाण्वादिगतमित्यर्थः॥अनित्यगतमिति परमाणुभिन्नपृथिव्यादिचतुष्टयगतमित्यर्थः॥
अनन्वकारणगतमेकत्वमसमवायिकारणमिति बोध्यं॥द्वित्वादिकमनित्यमेवेत्याह॥द्वित्वादिकं त्विति॥आदिना त्रित्वादिपरिग्रहः॥सर्वत्रेति॥नित्यानि
त्यद्वययोरित्यर्थः॥तथाचापेक्षाबुद्धिजन्यत्वा॥द्वित्वादिकमनित्यमेवेति भावः॥ननु कथमपेक्षाबुद्धिजन्यत्वमिति चेदुच्यते॥घटद्वयसन्निकर्षानंतरमय
मेकोऽयमेक इति ज्ञानं जन्यते॥इदमेवापेक्षाबुद्धिरित्युच्यते॥ततो घटद्वये द्वित्वमुत्पद्यते॥अत्र घटद्वयगतमेकत्वमसमवायिकारणं अपेक्षाबुद्धिर्नि
मित्तकारणं॥ततः द्वित्वद्वित्वत्वनिर्विकल्पकं॥ततः इमौ द्वाविति द्वित्वविशिष्टस्य प्रत्यक्षम्॥तन्निर्वाहार्थमेवापेक्षाबुद्धेस्त्रिक्षणावस्थायित्वं कल्प्यते॥
तस्मिन्नेव क्षणेऽपेक्षाबुद्धेर्नाशः॥तदुत्तरक्षणे च द्वित्वस्य नाशः अत्रापेक्षाबुद्धिनाशः कारणं॥एवं त्रित्वादावपि ज्ञेयं॥द्वित्वादिकं तु योगीश्वरापेक्षाबु
द्ध्या जन्यते॥तन्नाशश्च योगिनामपेक्षाबुद्धिनाशादिति ध्येयं॥ननु शब्दबुद्धिकर्मणां द्विक्षणावस्थायित्वात्कथमपेक्षाबुद्धिस्त्रिक्षणावस्थायिनी

त॰ तित्वेनैवम्॥ सर्वत्र तादृशनियमानंगीकारात्॥ इति संख्यानिरूपणम्॥ परिमाणं निरूपयति॥ मानेति॥ मानं परिमितिः॥ तस्या व्यवहारः॥ इदं महदिदमणि
सि॰ दी॰ त्याद्यात्मकस्तस्य कारणं परिमाणमेवेत्यर्थः॥ परिमाणस्याश्रयमाह॥ नवद्रव्येति॥ तच्च नित्यगतं नित्यमनित्यगतमनित्यं॥ परिमाणं विभजते॥
१८ ॥ तद्विति॥ परिमाणमित्यर्थः॥ चातुर्विध्यं दर्शयति॥ अण्विति परममध्यमभेदेन तद्द्विविधं॥ तत्र परमाणुत्वं ह्रस्वत्वं परमाणुमनसोः॥ मध्यमाणुत्वं ह्र
स्वत्वं द्व्यणुके॥ परममहत्त्वं दीर्घत्वं गगनादौ॥ मध्यममहत्त्वं दीर्घत्वं घटादौ॥ एतन्मौक्तिकादिदं मौक्तिकमणीति व्यवहारस्यापकृष्टमहत्त्वाद्गौणत्वं द्रष्टव्य
म्॥ एवं केतनाघननं ह्रस्वमित्यत्राप्यपकृष्टदीर्घत्वाद्गौणत्वं॥ परिमाणं क्वचित्संख्याजन्यं क्वचित्परिमाणजन्यं॥ क्वचित्प्रचयाख्यसंयोगजन्यं॥ तत्राद्यं पर
माणुद्वित्वजन्यं द्व्यणुके त्र्यणुके द्व्यणुकबहुत्वजन्यं त्र्यणुकं द्वितीयं॥ कपालपरिमाणजन्यं घटपरिमाणं॥ तृतीयं तु लावयवसंयोगजन्यं तूलावयवसंयोगजन्यं
तूलपिंडपरिमाणं॥ अयमेव संयोगः शिथिल इत्यप्युच्यते॥ इति परिमाणनिरूपणम्॥ पृथक्त्वं निरूपयति पृथगिति॥ अयमस्मात्पृथगिति यो व्यवहारस्तस्य
कारणं पृथक्त्वमेवेत्यर्थः॥ तच्चैकपृथक्त्वं द्विपृथक्त्वं त्रिपृथक्त्वादिभेदेन बहुविधं॥ तत्रैकपृथक्त्वं नित्यमनित्यं च नित्यगतं नित्यमनित्यगतमनित्यं॥ द्विपृथ राम॰
क्त्वादिकं तु सर्वत्रानित्यमेव॥ ननु भेदाति॥ रूपपृथक्त्वे किं मानमिति चेन्न॥ घटः पटान्नेति प्रतीतिविलक्षणाया घटः पटात्पृथगिति प्रतीतेरेव मानत्वात्॥ इ १८
ति पृथक्त्वनिरूपणं॥ संयोगं निरूपयति॥ संयुक्तेति॥ इमौ संयुक्ताविति यो व्यवहारस्तस्य हेतुः॥ संयोग एवेत्यर्थः॥ उपदर्शितलक्षणचतुष्टये॥ असाधा
रणपदं देयं॥ क्वचित्पुस्तके परिमाणपृथक्त्वलक्षणे असाधारणपदं दृश्यते॥ तत्त्वाधुनिकैर्न्यस्तमिति बोध्यम्॥ संयोगस्त्रिविधः॥ अन्यतरकर्मजोऽभ

यकर्मजः संयोगजभेदात्॥ तत्राद्यः॥ शकुंतशैलसंयोगः॥ द्वितीयो मेषयोः संयोगः॥ तृतीयस्तु दर्शित एव कायपुस्तकसंयोगः॥ कर्मजो द्विविधः॥ अभिघातो नो
दनं च॥ तत्रादिमः॥ शब्दकारिणीभूतः॥ द्वितीयः॥ चित्रादिकारिणीभूतः॥ इति संयोगनिरूपणं॥ विभागं निरूपयति॥ संयोगनाशक इति॥ संयोगनाशजनक इत्यर्थः॥ कालेति
व्याप्तिवारणाय गुणपदं॥ नन्वीश्वरेच्छायामतिव्याप्तिः यद्यसाधारणजनको विवक्षितस्तद्गुणपदस्य वैयर्थ्यं स्यादिति चेन्नैवम्॥ क्रियायामतिव्याप्तिवारणाय
तस्यावश्यकत्वात्॥ क्रिया क्रियातो विभागः॥ विभागात्पूर्वदेशसंयोगनाशः॥ उत्तरदेशसंयोगोत्पत्तिरिति नियमेन क्रियाया अपि तज्जनकत्वात्॥ ययोः संयोगस्तयो
रेव विभाग इति नियमात्मेरुकेलासौ विभक्ताविति व्यवहारो॥ गौणविभागोऽपि त्रिविधः॥ अन्यतरकर्मजो विभागजश्चेति॥ उदाहरणं पूर्ववद्बोध्यं॥ विभागजविभागो
द्विविधः॥ कारणमात्रविभागजः॥ कारणाकारणविभागजश्चेति॥ तत्रादिमः॥ कपालद्वयविभागाद्घटपूर्वदेशविभागः॥ द्वितीयः हस्तपुस्तकविभागात्॥ कायपुस्तक
विभागः॥ तस्याश्रयमाह॥ सर्वेति॥ इति विभागनिरूपणं॥ परत्वापरत्वे निरूपयति॥ परापरेति परव्यवहारासाधारणकारणं परत्वं॥ अपरव्यवहारासाधारणमपरत्व
मित्यर्थः॥ परत्वापरत्वे विभजते॥ तदिति द्वैविध्यमुत्पादयति॥ दिक्कृत इति॥ दैशिकपरत्वापरत्वे कालिकपरत्वापरत्वे चेत्यर्थः॥ तत्र दैशिकपरत्वमुदाहरति
॥ दूरस्थ इति॥ तदुत्पत्तिक्रमस्तु अभिहित एव॥ अत्र दिक्पिंडसंयोगो असमवायिकारणं॥ शेषं सुगमं॥ दैशिकमपरत्वमुदाहरति॥ समीपस्थ इति॥ तदुत्पत्तिश्चान्यत
र मूर्त्तसंयोगविशिष्टशरीरज्ञानात्॥ दैशिकपरत्वापरत्वे मूर्त्तमात्रवृत्तिनी भवतः॥ कालिकपरत्वमुदाहरति॥ ज्येष्ठेति॥ कालकृतं परत्वमिति॥ कालिकपरत्व
मित्यर्थः॥ तच्च जन्यवृत्तित्वमेव॥ तदुत्प[illegible]श्च कालपिंडसंयोगो असमवायिकारणं॥ कालिकमपरत्वमुदाहरति॥ कनिष्ठेति॥ कनिष्ठत्वमेव कालिकमपरत्वं॥ तदुत्प

त० सि० टी० १९

त्रिष्वात्मतरदिवाकरक्रियाविशिष्टशरीरज्ञानात्॥ कालेपरत्वापरत्वे जन्यद्रव्यमात्रवृत्तिनी भवतः॥ इति परत्वापरत्वनिरूपणम्॥ गुरुत्वं निरूपयति॥ आद्येति॥
आद्यं यत्पतनं कर्म विशेषस्तस्यासमवायिकारणं गुरुत्वमेवेत्यर्थः॥ द्वितीयादिपतनासमवायिकारणवेगेऽतिव्याप्तिवारणायाद्येति तच्च रत्तिकमाषकतोलकादिभेदेना
नेकधा॥ नित्यगतं नित्यमनित्यगतमनित्यं॥ इति गुरुत्वनिरूपणं॥ द्रवत्वं निरूपयति॥ स्यंदनेति॥ स्यंदनं स्रवणं तस्यासमवायिकारणं द्रवत्वमेवेत्यर्थः॥ तस्याश्रयमाह॥
पृथिवीति॥ तच्च जलपरमाणुभिन्ने नित्यमिति बोध्यं॥ विजनते तद्द्विविधमिति द्वैविध्यं दर्शयति॥ सांसिद्धिकमिति॥ स्वाभाविकं सांसिद्धिकं तेजः॥ संयोगजन्यं नैमित्ति
कमित्यर्थः॥ तत्र सांसिद्धिकमुदाहरति सांसिद्धिकमिति॥ नैमित्तिकमुदाहरति॥ पृथिवीति॥ ननु नैमित्तिकद्रवत्वस्य पृथिव्यां घृतादौ तेजसि च स्वर्णादौ चाभावात्कथं
पृथिवीतेजसोरत आह॥ पृथिव्यामिति॥ इति द्रवत्वनिरूपणं॥ स्नेहं निरूपयति॥ चूर्णेति॥ चूर्णं पिष्टं तदेवादिर्यस्य मृत्तिकादेः॥ स चूर्णादिस्तस्य पिण्डीभाव
::संयोगविशेषस्तस्य हेतुरसाधारणनिमित्तकारणं स्नेह एवेत्यर्थः॥ कालादावतिव्याप्तिवारणाय गुणपदं॥ रूपादावतिव्याप्तिवारणाय पिण्डीभावे
ति॥ चूर्णपदं स्पष्टार्थं॥ स च नित्यगतो नित्योऽनित्यगतोऽनित्यः॥ तैजसादावपि तदंतर्गतजलभागस्यैव स्नेहः॥ इति स्नेहनिरूपणम्॥ शब्दं निरूपयति॥ श्रो राम
त्रग्राह्यः॥ जातिमत्वे तात्पर्याद्गुणपदमनुपादेयं॥ अथ भेर्याद्यवच्छेदेनोत्पन्नशब्दस्य कथं श्रोत्रदेशे उत्पत्तिरिति चेन्न वीचीतरंगन्यायेन कदंबमुकु १९
कुलन्यायेन वा तदुत्पत्तेः॥ भेरीशब्दो मया श्रुत इति धीस्तु भ्रांतिरेव॥ अत एव भेरीजन्यतारशब्दो मया मंदशब्दस्तु दशः॥ श्रुत इत्यनुभवः॥ सांख्यवि
द्वांतिनो तु पृथिव्यादिपंचकस्य शब्दमिच्छंतः॥ स्वतंत्रास्तु भेर्यामेव शब्दः॥ मृदंगे शब्द इति व्यवहारात्पृथिव्यामेव शब्दमिच्छंति॥ तन्मतनिरासार्थमाह॥ आ

काशमात्रवृत्तिरिति तत्र युक्तिस्तु प्रदर्शितैव॥ शब्दं विभजते॥ स इति॥ भेर्याद्यवच्छेदेनेत्यर्थः॥ आकाशे जायमान इति शेषः॥ आदिना वेणुवीणामृदंगादेः परि
ग्रहः॥ वर्णात्मकमुदाहरति॥ वर्णात्मक इति॥ संस्कृतभाषादिरूप इति॥ अत्रादिपदेन लौकिकभाषादेः परिग्रहः॥ द्विविधोपि शब्दस्त्रिविधः संयोगजो विभागज
:शब्दजश्चेति॥ तत्राद्यः भेरीदंडसंयोगाद्ध्वन्यात्मकः कंठसंयोगाद्वर्णात्मकः॥ द्वितीयः वंशे पाट्यमाने दलद्वयविभागाद्ध्वन्यात्मकः॥ स च चटचटशब्दः॥ ओष्ठद्वयविभा
गाद्वर्णात्मकः॥ स च वकारादिः॥ तृतीयश्च द्वितीयशब्दादिचरमशब्दांतः॥ अत्र सर्वत्राकाशः समवायिकारणं भेर्याकाशसंयोगः॥ वंशदलाकाशविभा
गः ओष्ठाकाशविभागः॥ शब्दश्च तत्र तत्रासमवायिकारणं॥ अन्यत्सर्वं निमित्तकारणम्॥ तदुक्तं॥ संयोगाद्विभागाच्छब्दाच्च शब्दनिष्पत्तिरिति॥ तत्राश
श्रोत्तरोत्तरशब्देन योग्यविभुविशेषगुणानां नाशं प्रति स्वोत्तरवृत्तिगुणानां कारणत्वात्॥ अंत्यशब्दनाशस्तूपांत्यशब्दनाशेन॥ केचित्तु सुंदोपसुंदन्याये
नोपांत्यशब्दस्यांत्यशब्देनांत्यशब्दस्य चोपांत्यशब्देन नाश इत्याहुः॥ तन्न॥ अंत्यशब्दनाशपूर्वक्षणे उपांत्यशब्दस्यैव नष्टत्वेन॥ तस्य कारणत्वासंभ
वात्॥ ननु जैमिनीयाः॥ सोयं ककार इति प्रत्यभिज्ञाबलाच्छब्दस्य नित्यत्वमंगीचक्रुस्तत्कथमनित्यत्वमुपपादितमिति चेन्न॥ तदेवेदमौषधमिति प्र
तीतिवत्तस्याः॥ अपि साजात्यविषयिणीत्वात्॥ अत एवोत्पन्नः॥ ककारो विनष्टः॥ ककार इति प्रतीतिः॥ इति शब्दनिरूपणम्॥ बुद्धिं निरूपयति॥ स
वेति॥ सर्वेषि व्यवहाराः आहारविहारादयस्तेषां हेतुर्बुद्धिरित्यर्थः॥ सांख्यमते बुद्धेरंतःकरणात्मकत्वं तन्निरस्यति ज्ञानमिति॥ तथा च मनोभिन्ना
त्मस्कारणेभ्या नाभाव इति भावः॥ अथ वा बुद्धिशब्दस्यायं बुद्धिमानित्यत्र ज्ञानविशेषव्यवहारदर्शनात्॥ किं ज्ञानविशेषो बुद्धिरत आह॥

त॰
सि॰ टी॰
२०

ज्ञानमिति ज्ञानसामान्यमित्यर्थः॥ इति बुद्धिसामान्यनिरूपणम्॥ बुद्धिं विभजते॥ सेति बुद्धिरित्यर्थः॥ द्वैविध्यमुपपादयति॥ स्मृतिरितीति॥ स्मृतेर्लक्षणमाह॥ संस्का
रेति॥ संस्कारध्वंसेति व्याप्तिवारणाय ज्ञानमिति॥ अनुभवेति व्याप्तिवारणाय संस्कारजन्यमिति॥ सोऽयं देवदत्त इति प्रत्यभिज्ञायामतिव्याप्तिवारणाय
संस्कारमात्रजन्यत्वं विवक्षणीयं कश्चित्तथैव पाठः॥ न चैवं सत्यसंभवः॥ तस्याः संस्कारजन्यत्वे सति इन्द्रियार्थसन्निकर्षाजन्यत्वार्थकत्वात्॥ स्मृतित्वं
च स्मरामीत्यनुभवसिद्धो जातिविशेषः॥ इति स्मृतिसामान्यनिरूपणम्॥ अनुभवामीत्यनुभवसिद्धमनुभवत्वं प्रत्यक्षत्वजातिः॥ न त्वनुमित्यादिसा
धारणं तत्॥ तत्र तादृशप्रत्ययाभावादतोऽनुभवत्वं निर्वक्ति तद्भिन्नमिति॥ स्मृतित्वावच्छिन्नभिन्नमित्यर्थः॥ तेन यत्किंचित्स्मृतिभिन्नत्वस्य स्मृतौ सत्त्वेऽपि न
क्षतिः॥ घटादिवारणाय ज्ञानमिति स्मृतिवारणाय तद्भिन्नमिति॥ इत्यनुभवसामान्यनिरूपणम्॥ अनुभवं विभजते॥ स इति॥ यथार्थानुभ
वं लक्षयति॥ तद्वतीति॥ तद्वतीति तद्देवप्रकारो यस्य स तथेत्यर्थः॥ तद्वद्विशेष्यकत्वे तत्प्रकारक इति यावत्॥ भवति चायं घट इति ज्ञानं घटत्ववद्घटविशे
ष्यकं घटत्वप्रकारकं च॥ स्मृतिवारणायानुभव इति॥ अयथार्थानुभववारणाय॥ तद्वतीति॥ यथार्थ इति अनुभव इत्यनुषज्यते॥ घटे घटोऽन्वेत्यंशिक
संशयेऽपि घटत्वांशे प्रमैव॥ ननु रजते रजतमिति प्रमायामव्याप्तिः॥ तस्या रजतप्रकारकत्वेऽपि विशेष्यीभूतरजतत्वे रजतत्वस्याभावात्॥ सत्त्वेन रजतत्व
द्विशेष्यकत्वाभावादिति चेत्॥ तद्वतीति तत्प्रकारकत्वमित्यत्रार्थमनुसरामः॥ रजतत्वे रजतसंबन्धस्याधेयतात्मकस्य सत्त्वेन रजतसंबन्धवति रजतत्वे
रजते प्रकारकत्वं तादृशप्रमायामव्याहतमेव॥ ननु शास्त्रे प्रमापि स्वरूपते सा किं यथार्थानुभवात्मिका बुद्धिः॥ किं वा तदतिरिक्तेत्याशङ्कां निरस्यति से

राम॰
२०

वेति॥ यथार्थानुभवात्मिका या बुद्धिः सैव प्रमेत्यनु तद् इत्यर्थः॥ इति यथार्थानुभवसामान्यनिरूपणम्॥ अयथार्थानुभवं लक्षयति तदभाववतीति॥ तदभावविशेष्य
कस्तत्प्रकारकानुभवो अयथार्थानुभव इत्यर्थः॥ यथा शुक्ताविदं रजतमिति ज्ञानं भवति हि रजतत्वाभाववच्छुक्तिविशेष्यकं रजतत्वप्रकारकं
च ननु वृक्षः कपिसंयोगीति प्रमायामतिव्याप्तिः॥ तस्या मूलावच्छेदेन कपिसंयोगाभाववद्वृक्षविशेष्यकं रजतत्वप्रकारकं च ननु वृक्षः कपिसंयो
गीति प्रमायामतिव्याप्तिः॥ तस्या मूलावच्छेदेन तत्प्रकारकत्वमिति तदर्थत्वात्॥ तादृशप्रमायां कपिसंयोगाभावावच्छेदकीभूतमूलावच्छेदेन कपिसंयोगप्र
कारकत्वाभावेनातिव्याप्तिविरहात्॥ अत्र मीमांसकाः॥ अयथार्थज्ञानमेवाप्रसिद्धं न च तस्याप्रसिद्धत्वे कथं तद्भिन्नशुक्तौ रजतत्वप्रकारकविसंवादीच्छया
रजतार्थिनो विसंवादिप्रवृत्तिरिति वाच्यम्॥ पुरोवर्त्तिज्ञानरजतत्वस्मरणाभ्यामेव तत्संभवादित्याहुः॥ इदमकिंचित्करं॥ तथा सति नेदं रजतमिति बाधज्ञाना
दपि तदापत्तेः॥ उपस्थिते इष्टभेदज्ञानाभाव एव विसंवादिप्रवृत्तौ विसंवादिप्रवृत्तौ बीजमिति चेन्न॥ सत्यरजतस्थले तस्यैव विशिष्टज्ञानस्यैव प्रवर्त्तकत
या प्रामाणिकत्वेन लाघवात्तस्यैव सर्वत्र प्रवर्त्तकत्वौचित्यादित्यन्यथाख्यातिसिद्धेः॥ वाचस्पतिमिश्रास्तु शुक्ताविदं रजतमिति ज्ञाने प्रसिद्धशुक्तिरज
तयोरलीकरजतसमवायो भासत इत्यसत्ख्यातिमंगीचक्रुः॥ नेत्यपि युक्तं॥ असतो भानासंभवात्॥ इति यथार्थानुभवसामान्यनिरूपणम्॥ यथा
र्थानुभव इति॥ यथार्थानुभवश्च प्रत्यक्षमेवेति चार्वाकाः॥ अनुमितिरपीति कणादबौद्धौ॥ उपमितिरपीति नैयायिकैकदेशिनः॥ अर्थापत्तिकोपीति प्रा
भाकराः॥ अनुपलब्धिकोपीति भाट्टवेदान्तिनौ॥ सांभविकैतिह्यकावपीति पौराणिकाः॥ चैष्टिकमपीति तान्त्रिकाः एतेषां मते स्वरसात्तस्य चातुर्विध्यं

रित्यत्रादिनागंधादेःपरिग्रहः॥ननुपटरूपंप्रतितंतुरूपमसमवायिकारणंनस्यात्तयोः॥सामानाधिकरण्याभावात्समानाधिकरणयोरेवकार्य
कारणभावनियमादतआह॥कारणेनवेति॥कार्यसमवायिकारणेनवेत्यर्थः॥तथाचपटरूपकारणीभूतपटसामानाधिकरण्यस्यतंतुरूपेस
त्त्वात्परंपरासंबंधेनपटरूपसामानाधिकरण्यमपिसुलभमितिभावः॥समवायसंबंधेनकार्यसामानाधिकरण्यमेवकार्यैकार्थप्रत्यास
त्तिरित्युच्यते॥स्वसमवायिसमवायसंबंधेनकार्यसामानाधिकरण्यमेवकारणैकार्थप्रत्यासत्तिरित्युच्यते॥तथाचसमवायस्वसमवायिस
मवायान्यतरसंबंधेनकार्यसामानाधिकरण्यमेवकारणैकार्थप्रत्यासत्तिरित्युच्यते॥तथाचसमवायस्वसमवायिसमवायान्यतरसं
बंधेनकार्येणसहैकस्मिन्नर्थेसमवायेनप्रत्यासन्नत्वेसति॥आत्मविशेषगुणान्यत्वेसतिकारणमसमवायिकारणमितिफलितंतंतु
मात्रसमवेतत्वेसतिपटकारणंपटासमवायिकारणमितिविशेषलक्षणमेवमन्यत्रापि॥निमित्तकारणंलक्षयति॥तदुभयभिन्नमि
ति॥इदंचकारणत्रयंभावकार्यस्यैव॥अभावस्यतुनिमित्तमेवकारणंलक्षणमुपसंहरतितदिति॥यस्मात्कारणात्करणत्वघटकं
कारणत्वमुपदर्शितं॥तस्मात्कारणादेतत्त्रिविधसाधकमध्येयत्साधकतमंतदेवकरणमित्यर्थः॥इतिकरणप्रपंचः॥अथप्रत्यक्षखण्ड २२
प्रक्रियाकरणप्रपंचंचेतिरूप्यपूर्वोद्दिष्टप्रमाणविशेषाणांलक्षणंवक्तुमुपक्रमते॥तत्रेति॥प्रमाणचतुष्टयमध्येप्रत्यक्षज्ञानकरणं
साक्षात्कारिप्रमाकरणंप्रत्यक्षंप्र[illegible]त्यक्षप्रमाणमित्यर्थः॥अनुमानादिवारणायप्रत्यक्षेति॥यद्यपिप्रत्यक्षादिप्रमायाःप्रथमोद्दिष्ट

त्वात्तस्याएवादौलक्षणंवक्तुमुचितं॥तथापि॥तस्याःप्रमाणोपजीवकत्वेनतदुपजीव्यप्रमाणलक्षणमेवादावुचितमितिभावः॥तत्रक्वचि
दिंद्रियंक्वचिदिंद्रियार्थसंनिकर्षः॥क्वचिज्ज्ञानमतत्राद्यंनिर्विकल्पकज्ञाने॥द्वितीयश्च॥सविकल्पकज्ञानेनिर्विकल्पकज्ञानद्वारेंद्रियार्थसंनिकर्षः
॥तृतीयंचसविकल्पकज्ञानानंतरं॥यत्रहानोपादानोपेक्षाबुद्धयो॥भवंतितत्रसविकल्पकज्ञानंद्वारीकृत्यनिर्विकल्पकज्ञानं॥हानंचदुःखसाधनत्वज्ञान
म्॥यथासर्पोयंदुःखसाधनमिति॥उपादानंचसुखसाधनत्वज्ञानं॥यथास्रक्चन्दनवनितादिकंमत्सुखसाधनमिति॥उपेक्षाचोभयसाधनताभावज्ञा
नम्॥यथातृणंद्रावितिव्यापारवतःकरणत्ववादिनः॥इतिप्रत्यक्षप्रमाणनिरूपणं॥प्रत्यक्षप्रमाणंलक्षयति॥इंद्रियेति॥इंद्रियंचक्षुरादिकमर्थोघ
टादिस्तयोःसंनिकर्षः॥संयोगादिस्तज्जन्यंज्ञानंप्रत्यक्षमित्यर्थः॥संनिकर्षध्वंसवारणायज्ञानमिति॥अनुमित्यादिवारणायेंद्रियार्थसंनिकर्षेति॥
अथकवाटादिव्यवहितपदार्थप्रत्यक्षेव्याप्तिरितिचेन्न॥स्वच्छद्रव्यस्यतेजोनिरोधकत्वेनास्पंदतश्चक्षुषः॥प्रवेशसंभवात्॥अथदर्पणेकथंमुखप्रत्यक्षमि
तिचेन्न॥दर्पणप्राप्तचक्षुषैवपरावृत्त्यमुखंप्राप्यप्रत्यक्षजननात्॥क्वचित्स्वच्छद्रव्यस्येवदोषवशादन्यथाभानंदर्पणेमुखंपश्यामीतिधीस्तुभ्रमएव
॥एतेनप्रतिबिंबंपरास्तम्॥नचेश्वरप्रत्यक्षेव्याप्तिरितिवाच्यम्॥अत्रजन्यप्रत्यक्षस्यैवलक्ष्यत्वात्॥यदाहभगवान्सूत्रकारः॥इंद्रिया
र्थसंनिकर्षोत्पन्नंज्ञानमव्यपदेश्यमव्यभिचारिव्यवसायात्मकंप्रत्यक्षमिति॥अन्येतुज्ञानाकरणकंज्ञानंप्रत्यक्षं॥इदंचेश्वरप्रत्यक्षसाधार
णमिति॥इतिप्रत्यक्षसामान्यनिरूपणम्॥प्रत्यक्षंप्रमांविभजते॥निद्विति॥निष्प्रकारकमितिनामजात्यादियोजनारहितंवस्तुमात्रावगाहिज्ञा

नमित्यर्थः॥ ननु निर्विकल्पके किं मानमिति चेन्न॥ अयं घट इति विशिष्टबुद्धिर्विशेषणज्ञानजन्या विशिष्टबुद्धित्वात् किरीटीति विशिष्टबुद्धिवदित्यनुमान
स्यैव मानत्वात्॥ अत्र घटत्वरूपं यद्विशेषणं तज्ज्ञानमेव निर्विकल्पकमित्युच्यते॥ न च विशेषणज्ञानमपि सविकल्पकमेवास्तामिति वाच्यम् अनवस्था
प्रसंगात्॥ इति निर्विकल्पकनिरूपणं॥ सप्रकारकमिति विशिष्टज्ञानमित्यर्थः॥ अत्र नास्तिकाः॥ सविकल्पकं न प्रत्यक्षं तत्र घटत्वादिरूपाली
कोपरक्तत्वात्॥ वंध्यापुत्रज्ञानवत् निर्विकल्पकं तु स्वलक्षणवस्तूपरक्तत्वात्तदेव प्रत्यक्षं॥ न च तत्र किं मुद्देखिनी॥ अयं घटोऽयं घट इत्ये
काकारप्रतीतिर्भिन्नेषु विलक्षणेषु घटेषु॥ अतः सर्वानुगतधर्म आवश्यक इति वाच्यं॥ तस्यातद्व्यावृत्त्यात्मकत्वात्॥ अतद्व्यावृत्तिश्च तद्भि
न्नभेदः स च तुच्छ एवेत्याहुः॥ तदसत्॥ विधिमुखेनैवैकाकारप्रतीतेः तस्य निषेधरूपत्वायोगात्॥ इति सविकल्पकनिरूपणं तत्र तत्सं
षड्विधं॥ घ्राणरसनचाक्षुषश्रोत्रस्पार्शनमानसभेदात्॥ घ्राणजत्वादीनि॥ इति सविकल्पकनिरूपणोद्देशिकं तु जिघ्रामि॥ आस्वादये
शृणोमि स्पृशामि मनसा सुखं साक्षात्करोमीत्यनुभवसाक्षिको जातिविशेषः॥ इति प्रत्यक्षभाविशेषनिरूपणं॥ ननु प्रत्यक्षकारणमि राम
न्द्रियनिष्ठप्रत्यक्षसामानाधिकरण्यघटकसन्निकर्षः क इत्याकांक्षायां तं दर्शयन्विभजते॥ प्रत्यक्षेति लौकिकप्रत्यक्षेत्यर्थः॥ संयोगमुदाहरति २३
॥ चक्षुषेति॥ तथा च द्रव्यचाक्षुषस्पार्शनमानसेषु संयोग एव सन्निकर्ष इति भावः॥ संयुक्तसमवायमुदाहरति॥ घटरूपप्रत्यक्षमिति॥ चक्षुषा
जननीयमित्यनुषज्यते॥ तथा च द्रव्यसमवेतचाक्षुषस्पार्शनमानसरासनघ्राणजेषु संयुक्तसमवाय एव सन्निकर्ष इति भावः॥ ननु घटरूपेक

यं चक्षुषः संयुक्तसमवायमत एव तमुपपादयति॥ चक्षुः संयुक्त इति॥ ननु दूरस्य घटादेः सत्यपि संयुक्तसमवाये परिमाणाग्रहणं किमिति चेदत्राह
॥ परिमाणग्रहणे चक्षुष्यसन्निकर्षोप्यधिकं कारणं सर्वेन्द्रियावयवावयविनोरिन्द्रियावयवावयवयोरिन्द्रियावयवावयविनो
श्च संयोग इतरे तु दोषवशादेव न ग्रहणमिति वदन्ति॥ संयुक्तसमवेतसमवायमुदाहरति॥ रूपत्वसामान्यप्रत्यक्ष इति रूपत्वात्मकं यत्सामा
न्यं तत्प्रत्यक्ष इत्यर्थः॥ अत्रापि चक्षुषाजननीय इत्यनुवर्त्तते॥ तथा च द्रव्यसमवेतसमवेतचाक्षुषरासनघ्राणजस्पार्शनमानसेषु सं
युक्तसमवेतसमवायसन्निकर्ष इति भावः॥ अथ द्रव्यतत्समवेतप्रत्यक्षेपि संयुक्तसमवेतसमवाय एव सन्निकर्षोस्तु॥ इति चेन्नैतत्॥ आत्म
नोप्यनध्यक्षप्रसंगात्॥ समवायसन्निकर्षमुदाहरति॥ श्रोत्रेणेति॥ शब्दसाक्षात्कार इति जननीय इति शेषः॥ ननु श्रोत्रशब्दयोः॥ कथं सम
वाय इत्यपेक्षमाणं प्रत्युपपादयिष्यति॥ कर्णेति॥ अथ समवायस्य नित्यत्वेन शब्दप्रत्यक्षे को व्यापार इति चेच्छब्दः श्रोत्रमनः॥ संयोगो वेति गृहाण
समवेतसमवायमुदाहरति॥ शब्दत्वेति॥ विशेषणविशेष्यभाव इति॥ विशेषणभावः विशेष्यभाव इत्यर्थः॥ इन्द्रियसंबद्धविशेषणत्वमिन्द्रिय
संबद्धविशेष्यत्वमिति यावत्॥ विशेषणतासन्निकर्षमुपपाद्य दर्शयति॥ घटाभावेति॥ इह भूतले घटो नास्तीत्यादौ विशेष्यतासन्निकर्षोऽवसे
यः स प्रत्यक्षं तस्य विशेषणतादिभेदेन तस्यानेकत्वेपि विशेषणतात्वेन सैकैव॥ एवं विशेषणताविशेष्यतयोश्चान्यतरत्वेन ग्रहणं तत्सन्निकर्षेषि
हविरोधः॥ इति लौकिकसन्निकर्षविचारः॥ ननु विशेषणतासन्निकर्ष एव नास्ति॥ अतएवाभावप्रत्यक्षे योग्यानुपलब्धिः करणमिति चे

न० सि० टी० २७

त्॥ यद्यत्र घटः स्यात्तर्हि भूतलमिवाद्रक्ष्यत्॥ दर्शनाभावान्नास्तीति घटरूपप्रतियोगिसत्त्वप्रसञ्जनात् किं तु योग्यघटोपलंभः॥ तत्प्रतियोगिकाभावात्म
कयोग्यानुपलब्धिसहकृतेंद्रियेणैवाभावप्रत्यक्षं भवेत्तुपलब्धेः करणत्वस्यान्याय्यत्वात्॥ अत्राधिकरणप्रत्यक्षं प्रति इंद्रियेकरणत्वसावश्य
कत्वेनाभावप्रत्यक्षं प्रत्यपि विशेषणतासन्निकर्षस्वीकृत्य तस्यैव करणत्वस्योचितत्वादित्यास्तां विस्तरः॥ इत्यनुपलब्धिवादः॥ इदानीमलौकिक
सन्निकर्षो निरूप्यते॥ सन्निविधः सामान्यलक्षणो ज्ञानलक्षणो योगजधर्मलक्षणश्चेति। तत्राद्यः॥ इंद्रियसंबद्धविशेष्यकज्ञानप्रकारीभूत
घटत्वादिः॥ भवति च घटत्वादिरिंद्रियसंबद्धविशेष्यके ऽयं घट इति लौकिकप्रत्यक्षे प्रकारः॥ तदनंतरं तेन सन्निकर्षेण सर्वे घटाः इत्यलौ
किकप्रत्यक्षं जन्यते॥ न चेंद्रियसंबद्धसामान्यमेव प्रत्यासत्तिः॥ मृगतृष्णादौ जलभ्रमानंतरं सकलजलज्ञानं तस्मात्॥ तत्रेंद्रियजलत्वयोः॥ संबंधाभा
वात् मानसस्थले तु ज्ञानप्रकारीभूतं सामान्यमेव प्रत्यासत्तिः॥ अन्यथा परमाणुत्वेन यत्किंचित्परमाणुत्वेन यत्किंचित्परमाणौ प्रतीते परमाणु
त्वसामान्यलक्षणया सकलपरमाणूनां खिलानां मानसप्रतीतिर्न स्यात्॥ परमाणुमनसोः संबंधाभावात्॥ द्वितीयो यथा॥ अत्र सौरभज्ञानलक्षणं २७
यथा चाक्षुषसामग्र्या सुरभिचंदनखंडमिति सौरभांशे लौकिकं चंदनखंडांशे लौकिकं चाक्षुषं॥ तत्र सौरभस्मरणं प्रत्यासत्तिः सौरभांशे
चक्षुःसन्निकर्षासंभवात्॥ तृतीयस्तु॥ अदृष्टविशेषः॥ स द्विविधः॥ युक्तयुंजानभेदाद्योगिनो द्वैविध्यात्॥ तत्र युक्तस्य योगिनः॥ प्रथमप्रता
निरंतरमखिलपदार्थज्ञानं जायते॥ युंजानस्य चिंताविशेषसनाथाद्वितीयप्रत्यासत्तिमयविशेषज्ञानं॥ इति लौकिकसन्निकर्षनिरूपणम्॥ न

नु योगिसद्भावे किं प्रमाणमिति चेत्॥ परमाणवादिः॥ जन्यप्रत्यक्षविषयः अभिधेयत्वात्॥ घटवदित्यनुमानं गृहाण तत्र प्रत्यक्षं तु नास्माकं किंतु योगि
नामिति ध्येयम्॥ प्रत्यक्षप्रमामुपसंहरति॥ एवमिति उपदर्शितक्रमेणेत्यर्थः॥ ननु सिद्धांते प्रत्यक्षज्ञानकरणमिंद्रियार्थसन्निकर्षः किं नेत्याह॥ तत्कर
णमिति प्रत्यक्षप्रमाणं निगमयति॥ तस्मादिति प्रत्यक्षप्रमाकरणत्वादित्यर्थः सिद्धमिति सिद्धांते सिद्धमित्यर्थः॥ ॥इति श्रीसिद्धांतचंद्रोदये तर्कसंग्रहव्याख्या
ने प्रत्यक्षपरिच्छेदे प्रत्यक्षखंडं समाप्तम्॥ प्रत्यक्षानुमानयो रूपजीव्योपजीवकभावसंगतिमभिप्रेत्य प्रत्यक्षानंतरमनुमानं निरूपयति॥ अनुमितीति॥ अनुमितेः क
रणमनुमानमित्यर्थः॥ तच्च लिंगपरामर्श एवेति निवेदयिष्यति॥ अथ अनुमितिरेव केत्यत आह॥ परामर्शेति॥ प्रत्यक्षादिसाधारणाय विशेषणं परामर्शध्वंससाधा
रणाय विशेष्यम्॥ अथ परामर्शप्रत्यक्षेतिप्रसक्तिरिति चेत् नैवम्॥ साधनानवगाहित्वेनापि विशेषणीयत्वात्॥ न च तथा सति धूमवान् पर्वतो व
ह्निमानित्याकारकलिंगोपहितलैंगिकभानात्मिकानुमितावव्याप्तिरिति वाच्यम्॥ तादृशानुमितेरस्वीकारात्॥ ननु स्थाणुर्वा पुरुषो वेति संशयानं
तरं पुरुषत्वव्याप्यकरादिमानयमिति विशेषदर्शनजन्यपुरुष एवेति प्रत्यक्षे तिव्याप्तिरिति चेन्न॥ समानविषयकप्रत्यक्षसामग्र्यभावसहकृतप
रामर्शजन्यत्वस्य विवक्षितत्वात् सा च पक्षविशेष्यकपरामर्शत्व[illegible]प्रकारकपरामर्शत्वप्रकारिका द्विविधा दृष्टिपरामर्शात्प
त्वविशेष्यकैवेत्यपरे इत्यास्तां विस्तरः॥ इत्यनुमितिलक्षणम्॥ ननु अत्र परामर्शः किमत आह॥ व्याप्तीति॥ विषयित्वासंबंधेन व्याप्तिवि
शिष्टं पक्षधर्मताज्ञानं तदेव परामर्श इत्यर्थः॥ परामर्शमभिनीय दर्शयति॥ यथेति॥ तथा च वह्निव्याप्येत्यत्र व्याप्तेर्नानाद्रूपसा निरूपयद्व

त०
सि० टी०
२५

धर्मतायाभानादुभयमेव॥ व्याप्तिविषयकं पक्षधर्मताविषयकं चेति भावः॥ नन्वेतावता परामर्शविगतस्तज्जन्यत्वघटितलक्षणविशिष्टानुमितिः कीदृगतस्ताम
भिनयति॥ तज्जन्यमिति॥ परामर्शजन्यमित्यर्थः॥ इति परामर्शनिरूपणम्॥ अथ व्याप्तिविशिष्टेत्यत्र का व्याप्तिरित्याकांक्षायामाह॥ तत्रेति॥ यत्र धू
मस्तत्राग्निरिति व्याप्तेरभिनयः॥ साहचर्यनियम इति लक्षणम्॥ सहचरतीति सहचरस्तस्य भावः॥ साहचर्यम्॥ सामानाधिकरण्यमिति यावत्॥ तस्य
नियमो व्याप्तिरित्यर्थः॥ सा चाव्यभिचरितत्वम्॥ तच्च व्यभिचाराभावः॥ व्यभिचारश्च साध्याभाववद्वृत्तित्वम्॥ तथा च साध्याभाववदवृत्तित्वं व्याप्तिरिति
पर्यवसन्नम्॥ वह्निमान् धूमादित्यादौ साध्यं वह्निस्तदभाववान् जलह्रदादिस्तद्वृत्तित्वं नौकादावद्वृत्तित्वं प्रकृतहेतुभूतधूमे॥ इति लक्षणसमन्व
यः॥ धूमवान्वह्नेरित्यादौ साध्याभावाप्रसिद्धेरव्याप्तिः॥ न च सोऽदृढोपाध्यायैर्व्यधिकरणधर्मावच्छिन्नाभावस्योपगमेन तत्र वाच्यत्वत्वेन वाच्य
त्वाभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य प्रसिद्धत्वेन कथमव्याप्तिरिति शंक्यम्॥ चिंतामणिकारैरिङ्गतत्वात्॥ अंगीकारपक्षे
ऽपि तद्वद्वृत्तित्वस्याप्रसिद्धेः॥ प्रकृते तस्यानुपयोगाच्चेति चेन्न॥ केवलान्वयिन्यनुमितेरस्वीकारात्॥ स्वीकारे तु भ्रमात्मिकैवेति नव्याः॥ ॥
अन्ये तु॥ स च हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यं वह्निमान् धूमादित्यत्र हेतुर्धूमस्तत्समानाधिकरणो यो २५
त्यन्ताभावः॥ घटात्यन्ताभावस्तत्प्रतियोगि वह्निरूपं साध्यम्॥ तत्सामानाधिकरण्यं धूमे इति लक्षणसमन्वयः॥ धूमवान्वह्नेरित्यत्र हेतुर्वह्निस्त
त्समानाधिकरणो योऽत्यन्ताभावः॥ अयोगोलके धूमात्यन्ताभावस्तत्प्रतियोग्येव धूमरूपं साध्यमिति नातिव्याप्तिः॥ इदं वाच्यं ज्ञेयत्वादित्यादौ हे

तुर्ज्ञेयत्वं तत्समानाधिकरणो योऽत्यन्ताभावो घटात्यन्ताभावस्तत्प्रतियोगी घटः॥ अप्रतियोगी वाच्यत्वरूपं साध्यं तत्सामानाधिकरण्यं ज्ञेयत्व इति नाव्याप्ति
॥ अथ कपिसंयोगी॥ एतद्वृक्षत्वादित्यत्र हेतुरेतद्वृक्षत्वं॥ तत्समानाधिकरणो योऽत्यन्ताभावः॥ मूलावच्छेदेन कपिसंयोगात्यन्ताभावस्तत्प्रतियोग्येव
कपिसंयोगरूपं साध्यमित्यव्याप्तिरिति चेन्न॥ प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावस्याभिमतत्वादित्यलमतितर्ककर्कशविचारेण बा
लानां॥ इति व्याप्तिवादः॥ ननु ज्ञाते व्याप्तिः॥ परं तु पक्षधर्मताज्ञानमित्यत्र का नाम पक्षधर्मतेत्यपेक्षमाणं प्रति पक्षधर्मतास्वरूपं निरूपय
ति॥ व्याप्यस्येति॥ व्याप्यो नाम व्याप्त्याश्रयः॥ स च धूमादिरेव तस्य पर्वतादिनिरूपितवृत्तित्वं पक्षधर्मतेत्यर्थः॥ इति पक्षधर्मतानिरूपणम्॥ अथा
नुमानमितिकरणं कथं कथं वा तस्मादनुमितेर्जनिरिति जिज्ञासमानं प्रति लाघवादनुमानविभागमुखेनैव बोधयितुमनुमानं विभजते॥ अ
नुमानमिति॥ द्वैविध्यं दर्शयति॥ स्वार्थं परार्थं चेति॥ स्वस्यार्थः प्रयोजनं यस्मात्तत्स्वार्थमिति समासः॥ स्वप्रयोजनं च॥ स्वस्यानुमेयपदार्थप्र
तिपत्तिः एवं परार्थस्यापि॥ इदमेव तात्पर्यं मनसि निधाय स्वार्थानुमानं लक्षयति॥ स्वेतिन देवोपपादयितुं भूमिकां रचयति॥ तथाहीति॥ भूयोदर्शनेने
ति॥ धूमाग्न्योर्व्याप्तिग्रहः साध्यसाधनयोर्भूयः॥ सहचारदर्शनेनेत्यर्थः॥ ननु पार्थिवत्वलोहलेख्यत्वादौ शतशः॥ सहचारज्ञानेपि वज्रादौ व्यभिचारोप
लंभेन कथमिदं व्याप्तिग्राहकमिति चेन्न॥ सहचारज्ञानपदेन व्यभिचारज्ञानविरहसहकृतसहचारज्ञानस्यैवाभिमतत्वात्॥ व्यभिचारज्ञानं द्विविध
यथार्थोऽयथार्थश्च॥ तदपि द्विविधं निश्चयः शंका च त॥ द्विरहः क्वचित्तर्कात्॥ यथा धूमाग्न्योर्व्याप्तिग्रहे धूमो वह्निव्यभिचारी न वेति शंकायां धूमो

त० सि० टी० २७ व्याप्यतावच्छेदकानुसंधानेऽपि वह्निव्याप्यवान्पर्वत इति शाब्दज्ञाने परामर्शादनुमित्यनापत्तेः॥ व्यापारवत्कारणमिति मते व्याप्तिज्ञानमनुमा
नम्॥ लिंगपरामर्शो व्यापार इत्यवमेयम्॥ इत्यनुमानोपसंहारप्रकरणम्॥ लिंगं विभजते॥ लिंगमिति॥ अन्वयव्यतिरेकिणो लक्षणमाह॥ अन्व
येनेति॥ तृतीयायाः प्रयोज्यत्वमर्थः॥ साध्यसाधनयोः॥ साहचर्यमन्वयः॥ तदभावयोः साहचर्यं व्यतिरेकः॥ तथा चान्वयप्रयोज्यव्याप्तिमद्
व्यतिरेकप्रयोज्यव्याप्तिमन्वयव्यतिरेकीत्यर्थः॥ उदाहरति॥ यथेति॥ धूमवत्त्वमिति॥ धूमवत्त्वात्मकं लिंगमित्यर्थः॥ ननु कथमत्रान्वयव्या
प्तिः व्यतिरेकव्याप्तिश्च॥ अतस्तां क्रमेण प्रदर्शयति॥ तत्रेति॥ तथा चान्वयव्याप्तिस्तूपदर्शितैव॥ व्यतिरेकव्याप्तिश्च साध्याभावव्यापकीभूता
भावप्रतियोगित्वमित्यवसेयमिति भावः॥ केचित्तु साध्याभावसाधनाभावयोर्व्याप्तिर्व्यतिरेकव्याप्तिः॥ अन्यनिष्ठव्याप्त्या कथं साधना
दनुमितिरिति चेत्साध्याभावव्यापकीभूताभावप्रतियोगित्वेन साधनस्य पक्षवृत्तित्वज्ञानं सहकारीत्युक्तम्॥ व्याप्यव्यापकभावो हि भिन्नयो
र्दृश्यते॥ तयोरभावयोस्तस्माद्विपरीतः प्रतीयते॥ अन्वये साधनं व्याप्यं साध्यं व्यापकमिष्यते॥ साध्याभावोऽन्यथा व्याप्यो व्यापकः सा
धनात्यय इत्याहुः॥ अन्वये यद्दृष्टान्तस्य स्फुटतरत्वाद्व्यतिरेकदृष्टान्तं दर्शयति यथा महाह्रद इति॥ इत्यन्वयव्यतिरेकिग्रन्थः॥ केवलान्वयि २७
नो लक्षणमाह॥ अन्वयेति॥ अन्वयेनैव व्याप्तिर्यस्मिंस्तत्तथेति समासः॥ उदाहरति॥ यथेति॥ प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिं निरा
करोति॥ अत्रेति॥ अभिधेयत्वसाध्यकप्रमेयत्वसाधकानुमान इत्यर्थः॥ ननु कुतस्तन्निषेधस्तत्र हेतुमाह॥ सर्वस्येति॥ पदार्थमात्रस्येत्यर्थः॥ तथा

च सकलपदाभिधेयत्वस्येश्वर॥ प्रमाविषयत्वस्य चात्यन्ताभावाप्रतियोगित्वरूपकेवलान्वयित्वेन तदभावाप्रसिद्ध्या तद्घटितव्यतिरेकव्याप्तिर्न संभवत्ये
वेति भावः॥ इति केवलान्वयिग्रन्थः॥ केवलव्यतिरेकिणो लक्षणमाह॥ व्यतिरेकेति॥ पूर्ववत्समासः॥ उदाहरति॥ यथेति॥ नन्वेवं तथेति पृथिवी तु न गंधा
भाववतीत्यर्थः तस्मान्न तथेति॥ गंधाभाववत्त्वाभावादितरभेदाभाववती नेत्यर्थः॥ नन्वत्र किमिति नान्वयव्याप्तिरित्याशंकां परिहरति॥ अत्रेति इ
तरभेदसाध्यकानुमाने इत्यर्थः॥ इदमुपलक्षणम्॥ जीवच्छरीरं सात्मकं प्राणादिमत्त्वात्॥ यन्नैवं तन्नैवम्॥ यथा घटः॥ प्रत्यक्षादिकं प्रमाण
मिति॥ व्यवहर्तव्यं प्रमाकरणत्वात्॥ यन्नैवं तन्नैवम्॥ यथा प्रत्यक्षाभासः॥ विवादास्पदम्॥ आकाशमिति व्यवहर्तव्यं शब्दवत्त्वादित्यादि
कमपि केवलव्यतिरेकीति द्रष्टव्यम्॥ अपेतरभेदः प्रसिद्धो न वा नाद्यः यत्र प्रसिद्धस्तत्र गंधवत्त्वस्यापि सत्त्वे कुतोऽयमस्य च्छिरसि तीशाभिषेकः॥
तदधिकरणस्यैवान्वयदृष्टान्तत्वेन केवलव्यतिरेकित्वव्याघातत्वात्॥ यदि तत्र नास्ति गंधवत्त्वं तदा तस्यासाधारणत्वापत्तिः॥ न द्वितीयः॥ विशि
ष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वेन पृथिवी इतरभेदवतीति साध्यविशिष्टानुमित्यनापत्तेः॥ विशेषणीभूतेतरभेदस्याप्रसिद्ध्या तज्ज्ञानस्याप्य
प्रसिद्धेः॥ न च केवलमिदमेव दूषणं वक्तव्यं व्यतिरेकव्याप्ति॥ ज्ञानस्याप्यसंभवे न दूषणान्तरस्यापि जागरूकत्वात्॥ कथं तदसंभव इति चेत्॥ तज्जनके
तरभेदाभावज्ञानस्यायोगात् स एव कुत इति चेत्॥ तादृशज्ञानकारणीभूतेतरभेदज्ञानाप्रसिद्धेः॥ न च वक्तव्यं कथं तत्र कारणमिति॥ अभा
वज्ञाने प्रतियोगिज्ञानस्य कारणत्वादिति भावगर्भम्॥ जलभेदस्य तेजसि तेजोभेदस्य जल इति रीत्या॥ इतरभेदस्य प्रत्येकाधिकरणप्रसि

त॰
सि॰ टी॰
२८

दुःखपिणां तत्परत्वस्य साधनीयतया तद्विशिष्टानुमितिसंभवात्॥ सुतरां व्यतिरेकव्याप्तिज्ञानमपि इतरभेदपरत्वस्य पक्षातिरिक्तेऽप्रसिद्धत्वेन नान्व
यदृष्टाभेदपटत्वस्य पक्षातिरिक्तेऽप्रसिद्धत्वेन नान्वयदृष्टान्तनासाधारण्येन॥ अत्रेदं बोध्यम्॥ अन्वयव्यतिरेकि तु पंचरूपोपपन्नं तानिका
नीति चेद्रूपताम्॥ पक्षधर्मत्वम्॥ सपक्षसत्त्वम्॥ विपक्षाद्व्यावृत्तिः अबाधितविषयत्वम्॥ असत्प्रतिपक्षत्वं चेति॥ अबाधित॥ साध्यरूपवि
षयो यस्य तत्तथा तस्य भावस्तत्त्वम्॥ एवं साध्याभाववत्त्वम्॥ एवं साध्याभावसाधकं हेत्वन्तरं सत्प्रतिपक्ष इत्युच्यते॥ स एव नास्ति यस्य सो
सत्प्रतिपक्षस्तस्य भावस्तत्त्वं॥ केवलान्वयि तु चतूरूपोपपन्नमेव स्वसाध्यं साधयितुं क्षमते॥ तस्य विपक्षविपर्ययात्॥ केवलव्यतिरेक्यपि
तथा॥ तस्य सपक्षविपर्ययादिति॥ इति केवलव्यतिरेकिग्रंथः॥ अथ पृथिवीमात्रस्य पक्षत्वादित्यत्र किं नाम पक्षतेत्यपेक्षायां तां निर्वक्ति॥
संदिग्धेति॥ अथ यत्र तत्र न गर्जितेन मेघानुमितिस्तत्राव्याप्तिः॥ वह्नित्वत्पक्षकालीनवह्न्यनुमितिर्मेघाभावतामित्यनुमित्साजन्यानुमितिस्य
लेच॥ तत्र संदिग्धसाध्यस्याभावादिति चेन्न॥ एतन्मते तत्रानुमितेरस्वीकारात्॥ तदुक्तं॥ नानुपलब्धे न निर्णीतेर्थे न्यायः प्रवर्तते॥ अपि २८
तु संदिग्धार्थ एवेति स्वीकारे तु सिसाधयिषाविरहविशिष्टसिद्ध्यभावः॥ पक्षता॥ साधयितुमिच्छा सिसाधयिषा तस्या विरहोऽभावस्तद्विशिष्टासि
द्धिः साध्यनिश्चयस्तदभावः पक्षतेति तदर्थः॥ वर्त्तते च वह्न्यनुमिमित्साकुक्षणे पर्वते॥ तदानीं सिसाधयिषायाः सिद्धेश्चाभावात्॥ अभावमा
त्रेन पक्षता पर्वते वह्निमनुमिनुयामिति सिसाधयिषाशून्यकालेऽसिद्धिसत्वेप्यनुमित्यापत्तेः तदानीं यत्किंचिदभावस्य सत्वात्॥ न सिद्धय

भावस्तथा॥ सिसाधयिषाकालेसिद्धिसत्वेपि अनुमितिर्जायते न स्यात्॥ तदानीं सिद्ध्यभावात्॥ अनुमितौ सिसाधयिषोत्तेजिका॥ तद्विरहविशिष्टसिद्धिः॥
प्रतिबंधिकेति दिक्॥ इति पक्षताग्रंथः॥ प्रसंगात्सपक्षविपक्षौ क्रमेण निरूपयति निश्चितेति॥ तत्रैवेति॥ धूमवत्त्वे हेतावेवेत्यर्थः॥ एवम
ग्रेपि॥ इति सपक्षविपक्षनिरूपणम्॥ हेतुत्रिरूप्यप्रसंगाद्धेत्वाभासान्निरूपयति॥ सव्यभिचारेति उपदर्शितरूपाणां मध्ये कतिपयरू
पोपपन्नत्वाद्धेतुवदाभासंत इति हेत्वाभासाः॥ तत्त्वं चानुमितितत्करणान्यतरप्रतिबंधकयथार्थज्ञानविषयत्वम्॥ बाधस्थले वह्निरनुस्स
द्रत्यनुमितिप्रतिबंधकं यज्ञानमुस्मत्त्ववद्ध्रदाववनुस्मत्वसाधकद्रव्यत्वमित्याकारकं तद्विषयत्वस्य द्रव्यत्वरूपहेत्वाभासे सत्त्वाल्लक्षणस
मन्वयः॥ इत्यमसाधारणविरुद्धसत्प्रतिपक्षज्ञानस्यापि साक्षादनुमितिप्रतिबंधकत्वं बाधश्च साध्याभाववत्तद्विशिष्टः॥ पक्षो बाध॥ वह्निमान्
प्रमेयत्वादित्यादौ व्यभिचारि॥ पर्वतो वह्निमानित्याद्यनुमितिकरणं वह्निव्याप्यं प्रमेयत्वमित्यादिज्ञानं तत्प्रतिबंधकं च वह्न्यभाववद्वृत्ति
प्रमेयत्वमित्यादिज्ञानम्॥ तद्विषयत्वस्य प्रमेयत्वादौ सत्त्वाल्लक्षणसमन्वयः॥ इत्यमनुपसंहारिप्रभृतिज्ञानामनुमितिकरणप्रतिबंधक
त्वं बोध्यम्॥ बाधभ्रममादाय सद्धेतुवारणाय यथार्थेति दिक्॥ इति हेत्वाभाससामान्यनिरूपणम्॥ बालान्बोधयितुं प्राचीनसंकेतम
पिदर्शयति॥ अनैकांतिक इति॥ इत्युच्यत इति शेषः॥ तत्त्वं च स्म॥ धारणाद्यन्यतमत्वम्॥ विभजनेसत्रिविध इति॥ साधारणं लक्षयति॥ तत्रेति॥
साधारणादित्रितयमध्ये इत्यर्थः॥ उदाहरति॥ यथेति॥ ननु प्रमेयत्वस्य कथं साध्याभाववद्वृत्तित्वमतस्तदुपपादयति॥ प्रमेयत्वस्येति॥ अथवि

त० रुद्धेति प्रसक्तिरिति मास्मदूष्यः॥ सपक्षवृत्तित्वस्यापि निवेशात्॥ अथैवमपि स्वरूपासिद्धे दूषणं जागर्तीति मा वह गर्वम्॥ पक्षवृत्तित्वस्यापि तथात्वात्
सि० टी० ॥ असाधारणं लक्षयति सर्वेति॥ सर्वेभ्यः सपक्षेभ्यो व्यावर्त्तते निवर्त्तत इति व्यावृत्तः॥ उदाहरति॥ यथेति॥ उपपादयति॥ शब्दत्वं हीति नित्येभ्य इति॥
२९ आकाशादिभ्य इत्यर्थः॥ अनित्येभ्य इति॥ घटपटादिभ्य इत्यर्थः॥ अत्राकाशस्य पक्षत्वात् घटपटादिर्विपक्षः॥ अनुपसंहारिणं लक्षयति॥ अत्रेति॥ उप
दर्शितानुमाने इत्यर्थः॥ इति सव्यभिचारनिरूपणम्॥ विरुद्धं लक्षयति॥ साध्येति॥ कृतकत्वादिति कार्यत्वादित्यर्थः॥ अनित्यत्वेन व्याप्तमिति॥
॥ यद्यत्कृतकं तत्तदनित्यमिति व्याप्तेर्भवत्येव तस्येति भावः॥ इति विरुद्धनिरूपणम्॥ सत्प्रतिपक्षं लक्षयति यस्येति॥ यस्य हेतोः साध्याभावसाधकं
साध्याभावस्यानुमापकं हेत्वन्तरं प्रतिपक्षो हेतुर्विद्यते स सत्प्रतिपक्ष इत्यर्थः॥ अयमेव प्रकरणसम इत्युच्यते॥ इति सत्प्रतिपक्षनिरूपणम्
॥ असिद्धं विभजते असिद्ध इति॥ आश्रयासिद्ध्याद्यन्यतमत्वम्॥ त्रैविध्यं दर्शयति॥ आश्रयासिद्ध इति आश्रयासिद्धत्वं पक्षतावच्छेदकाभा
वकत्वम्॥ नवति हि॥ अरविंदं गगनीयत्वरूपपक्षतावच्छेदकाभावकम्॥ अरविंदस्य रूपपते गगनीयत्वस्य विरहात्॥ आश्रयासिद्धमुदाहरति॥ त
त्रेति॥ ननु कथमरविंदे गगनीयत्वविरहः॥ अत आह॥ अत्रेति॥ उपदर्शितानुमान इत्यर्थः॥ स्वरूपासिद्धमुदाहरति॥ स्वरूपासिद्ध इति॥ २९
पक्षावृत्तित्वं स्वरूपासिद्धत्वं॥ इदमेव लक्षणं मनसि निधायोपपादयति अत्रेति॥ उक्तानुमान इत्यर्थः॥ तथा च चाक्षुषत्वं शब्देनास्तीत्यने
न चाक्षुषत्वे पक्षावृत्तित्वमर्थात् सिद्धमिति भावः॥ अथ शब्देन कुतश्चाक्षुषत्वमत आह॥ शब्दस्येति॥ सोयं स्वरूपासिद्धः शुद्धासिद्धभागा

सिद्धविशेषणासिद्धभेदेन बहुविधः॥ तत्राद्यस्तूपदर्शित एव द्वितीयो यथा॥ उद्भूतरूपादिचतुष्टयगुणः रूपत्वादिति॥ अत्र रूपत्वहेतोः॥ पक्षैकदेश
वृत्तित्वेन भागे स्वरूपासिद्धत्वं॥ तृतीयो यथा॥ वायुः प्रत्यक्षः रूपवत्त्वे सति स्पर्शवत्त्वादिति॥ अत्र रूपवत्त्वविशेषणस्य वायावभावेन तद्विशि
ष्टस्पर्शवत्त्वस्यापि तथात्वेन तस्य स्वरूपासिद्धत्वम्॥ निर्वहति॥ विशेषणाभावे विशिष्टस्याप्यभावात्॥ तुरीयो यथा॥ अत्रैव विशेषणविशेष्य
वैपरीत्येन हेतुः तस्य स्वरूपासिद्धत्वं तु विशेष्याभावप्रयुक्तविशिष्टाभावादिति बोध्यम्॥ व्याप्यत्वासिद्धं निरूपयति॥ सोपाधिक इति॥ ननु को
ऽयमुपाधिरत आह॥ साध्येति॥ ननु किं तर्हि साध्यव्यापकत्वं साधनाव्यापकत्वं च॥ अतस्तत्क्रमेण दर्शयति॥ यत्र धूम इति॥ उपाधिरिदमाद्यसा
संभववारणाय व्यापकत्वशरीरे अत्यन्तपदम्॥ साधनं चेदमाद्यसाधनस्योपाधित्ववारणायाव्यापकत्वशरीरेऽप्यत्यन्तपदमावश्यकम् उपाधिमु
पसंहरति॥ एवमिति॥ उक्तरीत्येत्यर्थः॥ सोयमुपाधिस्त्रिविधः केवलसाध्यव्यापकः साधनावच्छिन्नसाध्यव्यापकश्चेति तत्राद्यस्तूपदर्शित एव॥
एवं क्रत्वन्तर्वर्तिनी हिंसा धर्मसाधनम्॥ हिंसात्वात्॥ क्रतुबाह्यहिंसावदित्यत्र निषिद्धत्वमुपाधिः॥ तस्य यत्र धर्मसाधनत्वं तत्र निषिद्धत्व
मिति साधनाव्यापकता च॥ अहिंसात्सर्वभूतानीति सामान्यवाक्यतः पशुना यजेतेत्यादिविशेषवाक्यस्य बलीयस्त्वात्॥ अत एव हिंसात्वं न
धर्मसाधनत्वे प्रयोजकमपितु निषिद्धत्वमेवेत्यादिकमपि द्रष्टव्यम्॥ द्वितीयो यथा वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूतरूपव
त्त्वमुपाधिः तस्य यत्र प्रत्यक्षत्वं॥ तत्रोद्भूतरूपवत्त्वमिति न केवलसाध्यव्यापकत्वम्॥ रूपे व्यभिचारात्॥ किं तु द्रव्यत्वलक्षणो यः पक्षधर्मस्तदवच्छि

त्ववद्धिः॥ प्रत्यक्षत्वं यत्र तत्रोद्भूतरूपवत्त्वमिति पक्षधर्मावच्छिन्नसाध्यव्यापकत्वमेव॥ आत्मनि व्यभिचारवारणाय बहिःपदम्॥ यत्र प्रत्यक्षस्पर्शा
श्रयत्वं तत्रोद्भूतरूपवत्त्वमिति साधनाव्यापकत्वं च॥ वायावुद्भूतरूपवत्त्वस्य विरहात्॥ तृतीयो यथा॥ प्रागभावो विनाशी जन्यत्वादित्यत्र भावत्व
मुपाधिः। तस्य यत्र विनाशित्वं तत्र भावत्वमिति न केवलं साध्यव्यापकत्वं प्रागभावे भावत्वविरहात्॥ किंतु जन्यत्वरूपसाधनावच्छिन्नविनाशित्वं
यत्र तत्र भावत्वमिति साधनावच्छिन्नसाध्यव्यापकत्वमेव यज्जन्यत्वं तत्र न भावत्वमिति साधनाव्यापकत्वं च॥ ध्वंसे भावत्वविरहात्॥ एवं
स श्यामो मैत्रीतनयत्वादित्यत्र शाकपाकजत्वमुपाधिः॥ श्यामत्वस्य मैत्रजघटेपि सत्त्वान्न केवलं साध्यव्यापकं तत् किंतु साधनावच्छिन्नसा
ध्यव्यापकमेव॥ अष्टमपुत्रे शाकपाकजत्वविरहेण साधनाव्यापकं चेत्यादिकमपि द्रष्टव्यम्॥ अथ वह्निमान् धूमादित्यत्र महान
सत्त्वाभावोऽप्युपाधिः स्यात्॥ तस्य महानसभिन्नत्वलक्षणपक्षधर्मावच्छिन्नसाध्यव्यापकत्वादिति चेन्न पक्षधर्मेत्यत्र पक्षदृष्टां
तोभयसाधारणधर्मस्यैव विवक्षितत्वात्॥ अथ तर्हि गतमुपाधिलक्षणमिति चेन्न॥ निरवच्छिन्नसाध्यव्यापकत्वदृष्टान्तोभयसाधारण
धर्मसाधनान्यतरावच्छिन्नसाध्यान्यतरव्यापकत्वे सति साधनाव्यापक उपाधिरिति॥ तस्य परिष्करणीयत्वात्॥ इदं च लक्षणमाचार्याणा ३०
मेवाभिमतम्॥ लक्षणान्तरं तु ग्रंथांतरे द्रष्टव्यम्॥ इत्युपाधिवादः॥ ननु नैतावतोपाधिरवगतः॥ किं तर्हि व्याप्यत्वासिद्धमत आह वह्निमत्त्व
मिति॥ तस्य व्याप्यत्वासिद्धत्वे हेतुमाह॥ सोपाधिकत्वादिति॥ इत्यस्मदुपदर्शितहेतवोपि द्रष्टव्याः॥ इत्यसिद्धनिरूपणम्॥ बाधितं स

ध्यति॥ यस्येति॥ अयमेव कालात्ययापदिष्ट इत्युच्यते॥ स्पर्शनेनेति॥ त्वगिंद्रियेणेत्यर्थः॥ एवं घटः क्षणिकः सत्त्वादित्यादिरपि बाधितः॥ तत्र सोयं
घट इति प्रत्यभिज्ञारूपप्रत्यक्षेण क्षणिकत्वलक्षणसाध्याभावस्य परिच्छिन्नत्वात्॥ इति बाधितनिरूपणम्॥ दुष्टलक्षणमपि हेत्वाभास एव॥ यथा अ
व्याप्तं लक्षणं भागासिद्धेश्चांतर्भवति॥ अतिप्रसक्तं व्याप्यत्वासिद्धे॥ असंभावितं स्वरूपासिद्धे सिद्धसाधनं चाश्रयासिद्धे॥ संदिग्धसाध्यवत एवाश्रयत्वा
त् नव्यास्तु॥ तस्य दूषितत्वेन सिद्धसाधनं निग्रहस्थानान्तरमेवेति वदंति॥ इति श्रीसिद्धान्तचंद्रोदये तर्कसंग्रहव्याख्याने तृतीयपरिच्छेदेऽनुमा
नखण्डं समाप्तम्॥ एवमवसरसंगतिमभिप्रेत्यानुमानानन्तरमुपमानं निरूपयति॥ उपमितीति॥ उपमितिकरणमुपमानमित्यर्थः॥ तत्र सादृश्य
ज्ञानमिति निवेदयिष्यति॥ ननूपमितिरेव केत्यत आह॥ संज्ञेति॥ संज्ञा च पदं संज्ञी चार्थस्तयोः संबंधो वाच्यत्वम्॥ तत्प्रकारकं गवयो गवयपदवाच्य
इति ज्ञानमुपमितिरित्यर्थः॥ उपमितित्वं चोपमिनोमीत्यनुभवसिद्धो जातिविशेषः॥ ननूपमितिकरणमुपमानमित्युक्तं किं तदत आह॥ तत्करण
मिति॥ सादृश्यप्रकारकं ज्ञानमित्यर्थः॥ उपमितिकरणत्वं तस्य प्रतिपादयितुं प्रतिजानीते॥ तथाहीति वाक्यार्थस्मरणम्॥ गोसदृशं पश्यतीति॥
गोसदृशं पश्यन्नतिदेशवाक्यार्थं स्मरतीत्यर्थः॥ अयं गवयपदवाच्य इति॥ अभिप्रेत गवयो गवयपदवाच्य इत्यर्थः॥ तेन गवयान्तरे शक्तिग्र
हाजायप्रसंग इति दूषणं परास्तम्॥ तथा च गोसादृश्यविशिष्टपिंडज्ञानं करणम्॥ अतिदेशवाक्यार्थस्मरणमवान्तरव्यापारः॥ उपमि
तिः फलमिति सारम्॥ तत्रोपमानं त्रिविधम्॥ सादृश्यविशिष्टपिंडज्ञानमसाधारणधर्मविशिष्टपिंडज्ञानं वैधर्म्यविशिष्टपिंडज्ञानं च॥ तत्रा

त० वमुक्तमेव॥ द्वितीयं यथा॥ खड्गमृगः कीदृगिति दृष्टे नासिकालसदेकशृंगो गोतिक्रांतगात्र इति श्रुत्वा तज्ज्ञानवतः क्वाप्यरण्यांतरे तादृशपिंडं पश्यन्नतिदेशवा
सि० टी० क्यार्थं स्मरति तदनंतरं खड्गोऽयं खड्गपदवाच्य इत्युपमितिरुत्पद्यते॥ अत्र नासिकालसदेकशृंगमेवासाधारणधर्मः॥ तृतीयं यथा॥ उष्ट्रः कीदृगिति दृष्टे
३१ ऽश्वादिवत्समानदृष्टा ह्रस्वग्रीवशरीरश्च नेत्याप्तोक्तेरितिकालांतरं त्विंदुरदर्शनादेवधर्मविशिष्टपिंडज्ञानं॥ ततोऽतिदेशवाक्यार्थस्मरणं तत उ
ष्ट्रोऽयमुष्ट्रपदवाच्य इत्युपमितिरुत्पद्यत इत्याहुः॥ नन्वाप्तवाक्यजन्यत्वाच्छाब्दबोध एवास्त्विति चेन्न॥ उपमिनोमीत्यनुव्यवसायस्यापप्रसंगादि
ति सर्वं रमणीयम्॥०॥ ॥इति श्रीसिद्धांतचंद्रोदये तर्कसंग्रहव्याख्याने तृतीयपरिच्छेदे उपमानखंडं समाप्तम्॥ उपजीव्योपजीवकभा
वसंगतिमभिप्रेत्योपमानानंतरं शाब्दं निरूपयति॥ आप्तेति॥ शाब्द इति शब्दप्रमाणमित्यर्थः॥ भ्रांतविप्रलंभकयोर्वाक्यस्य शब्दप्रमाण
त्ववारणाय आप्तेति॥ ननु कोऽयमाप्तः॥ अत आह॥ आप्तस्त्विति॥ यथार्थवक्ता यथाभूताबाधितार्थोपदेष्टा॥ ननु वाक्यं किमत आह वाक्यमि
ति॥ पदं लक्षयति॥ शक्तमिति॥ निरूपकतासंबंधेन शक्तिविशिष्टमित्यर्थः॥ इति पदसामान्यनिरूपणम्॥ अथ शक्तिर्निरूप्यते॥ नु
ननु शक्तिरेव का॥ अत आह॥ अस्मादिति॥ घटपदाद्घटरूपार्थो बोद्धव्य इतीश्वरेच्छैव शक्तिरित्यर्थः॥ अर्थस्मृत्यनुकूलपदपदार्थसंबंधत्वं तल्लक्षणं ३१
सा च पदार्थान्तरमिति मीमांसकाः॥ तन्न मानाभावात्॥ आधुनिके नाम्नि कण्ठकादावशेषे इति पितानाम कुर्यादितीश्वरेच्छास्त्येव॥ नव्यास्तु आधु
निसंकेतितडित्थादिपदेष्वीश्वरेच्छाया अभावादिच्छैव शक्तिरिति भणंति॥ शक्तिग्रहश्च वृद्धव्यवहाराद्भवति तथाहि॥ उत्तमवृद्धेन घटमानयेति

वाक्ये प्रयुक्ते॥ मध्यमवृद्धो घटमानयति॥ तद्दृष्ट्वा बालो व्युत्पित्सुर्बालोऽन्वयव्यतिरेकाभ्यां घटमानयेति वाक्यजन्यत्वं मध्यमवृद्धप्रवृत्तिकज्ञाने
निश्चिनोति ततो गामानय घटं नयेति वाक्यांतरस्थ एव आवापोद्वापाभ्यां घटपदस्य घटत्वविशिष्टे शक्तिः गोपदस्य गोत्वविशिष्टे शक्तिरिति तां गृ
ह्णाति॥ एवमसति बाधके धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणाद्भवति॥ क्वचिदुपमानादितोऽपि तदुक्तम्॥ शक्तिग्रहो व्याकरणोपमा
नकोशाप्तवाक्याद्व्यवहारतश्च॥ वाक्यस्य शेषाद्विवृतेर्वदंति सान्निध्यतः सिद्धपदस्य वृद्धाः इति॥ एवमयमार्यैर्वर्ततीन्यत्र यवपदस्य दीर्घशूकविशेषे वसंते स
र्वस्यानाशुपते पत्रशातनं॥ मोदमानाश्च तिष्ठंति यवाः कणिशशालिन इति वाक्यशेषाच्छक्तिरवधार्यते॥ हस्ती चूर्णितोऽतस्य गजो न्यूर्णतीति विवर
णे हस्तिपदस्य गजे शक्तिग्रहः॥ विवरणं च समानार्थबोधकपदांतरेण तदर्थकथनमिदमेव विवृतिरित्युच्यते॥ इह विकचसरोरुहे भ्रमर इत्या
दौ प्रसिद्धपदसान्निध्याद्भ्रमरादेः शक्तिग्रहः॥ शेषं सुगमम्॥ नव्यास्तु॥ गवादिपदानां व्यक्तावेव शक्तिः॥ न तु जातावपि गौरवादिति मेनिरे॥ मीमांसका
स्तु॥ विशेषणत्वेन गोत्वादेरेव प्रथममुपस्थितत्वाद्गवादिपदानां गोत्वादावेव शक्तिः॥ व्यक्तिलाभस्तु गोत्वस्याश्रयं विनानुपपन्नमित्याक्षेपादित्याहु
ः॥ तदसत्॥ विनाप्याक्षेपं गौश्चरतीत्यनेन व्यक्तिप्रतीतेः॥ प्राभाकरास्तु॥ गवादिशब्दानामानयनादिरूपकार्यान्विते गवादौ शक्तिः॥ सर्वत्र कार्य
वाक्यादेव व्युत्पत्तेः॥ अत एव घटमित्यादिसिद्धवाक्ये तु न व्युत्पत्तिरित्याहुः॥ तदसत्॥ इह कोऽयं पुर्यां सकलजनमनोरथदायिनी करुणा चेति सिद्धवाक्ये
पामराणामपि व्युत्पत्तिदर्शनात्॥ चैत्रः पचतीत्यादावाख्यातस्य कर्तरि शक्तिरिति वैयाकरणाः॥ तन्न॥ गौरवात् किंतु कृतावेव॥ तथा च

॥ गवादिशक्तिगृहे गृहीतशक्तिक॥ गवादिशब्दस्तज्ज्ञानं वा करणम्॥ पदजन्यपदार्थस्मरणमवान्तरव्यापारः॥ आकांक्षा योग्यता सन्निधिता
त्पर्यज्ञानानि सहकारीणि शाब्दबोधः फलमिति सारम्॥ इति शब्दशक्तिवादः॥ पदं चतुर्विधम्॥ यौगिकं रूढं योगरूढं यौगिकरूढं च॥ अवयव
शक्तिर्योगः॥ अवयवमात्रशक्तिकं यौगिकम्॥ यथा पाचकादिपदम्॥ समुदायशक्ती रूढिः॥ समुदायमात्रशक्तिकं रूढं॥ यथा गोपद
म्॥ अवयवसमुदायोभयशक्तिकमेकजातीयार्थप्रतिपादकं योगरूढम्॥ यथा पंकजादिपदम्॥ अवयवशक्त्या पंकजनिकर्तृत्वेन रूपेण कम
लमेव बोधयति॥ समुदायशक्त्या च कमलत्वेन रूपेण यौगिकार्थरूढ्यर्थयोः स्वातंत्र्येण बोधकं यौगिकरूढम्॥ यथोद्भिदादिपदम्॥ यो
गेन तरुगुल्मादि रूढ्या यागस्तानविशेषं॥ शक्तिरिव लक्षणापि पदस्य वृत्तिः॥ इति पदविशेषनिरूपणम्॥ अथ केयं लक्षणा॥ शक्यसं
बंधो लक्षणा॥ वर्तते च गंगायां घोष इत्यत्र गंगापदशक्यप्रवाह॥ संबंधस्तीरे लक्षणाबीजं तु तात्पर्यानुपपत्तिः॥ अन्यथा प्रवाहे॥ घो
षतात्पर्यानुपपत्तेस्तीरे लक्षणा सिद्ध्यति॥ तात्पर्यं च वक्तुरिच्छा॥ वक्ता चाभिसंधाय यितातेन मौनिवाक्येऽव्याप्तिः प्रत्युक्ता॥ सा च लक्षणा त्रि
धा॥ जहल्लक्षणा अजहल्लक्षणा जहदजहल्लक्षणा चेति॥ यत्र वाच्यार्थस्यान्वयस्तत्राद्या॥ यथा गंगायां घोषः॥ मंचाः क्रोशंतीत्यादौ॥ ३२
यत्र वाच्यार्थस्याप्यन्वयस्तत्र द्वितीया॥ यथा छत्रिणो यांतीत्यादौ॥ अत्र छत्रिणां तदितरेषां च गमनान्वयः॥ यत्र वाच्यैकदेशबाधेनैकदे
शान्वयस्तत्र तृतीया॥ यथा स एव घटोऽस्तीत्यादौ॥ अत्र तद्देशकालविशिष्टस्य बाधतः॥ तत्पुरुषे राजपुरुष इत्यत्र राजपदस्य राज

संबंधिनि लक्षणा बहुव्रीहौ चित्रगुरित्यत्र गोपदं गोस्वामिलक्षकम्॥ चित्रपदं तात्पर्यग्राहकम्॥ द्वंद्वे धवखदिरौ छिंधीत्यत्र धवखदि
रपदयोस्तद्वयेऽप्रकारतया भासमानद्विवचनार्थद्वित्वे लक्षणा॥ कर्मधारये तु नीलोत्पलमित्यादौ न लक्षणा॥ निषादस्थपतिं या
जयेदित्यत्रापि वेदबोधितयागजनानुपपत्त्या पत्नीयुक्तवेदे तस्याधिकारकस्यनं॥ स्त्रीशूद्रौ नाधीयातामिति वेदस्य निषादातिरिक्त
स्त्रीशूद्रपरत्वं॥ दध्ना छादयेत्यत्र द्वितीयालोपस्य लेदधिपदस्य दधिकर्मत्वे लक्षणा॥ घटो न पट इत्यत्राभावार्थकनञो घटभिन्ने लक्ष
णा घटं जानातीत्यादावाख्यातस्याश्रयत्वे लक्षणा॥ रथो गच्छतीत्यादावाख्यातस्य गमनानुकूलव्यापारे लक्षणा॥ प्रजयतीत्यादौ न
यार्थकधातोः प्रकृष्टनये लक्षणा॥ उपसर्गस्तु तात्पर्यग्राहक इति संक्षेपः॥ गच्छ गच्छसि चेत्कांत पंथानः संतु ते शुभाः॥ ममापि जन्म त
त्रैव भूयाद्यत्र गतो भवानित्यत्र त्वद्गमनान्मत्प्राणवियोगो भविष्यतीति॥ बोधाय व्यंजनाख्यं वृत्त्यंतरमेच्छंत्यालंकारिकाः॥ सापि लक्षणाऽ
पाग्निर्माणवक इत्यत्र माणवके ऽग्निसादृश्यबोधाद्गौणी तु वृत्त्यंतरमेवेति मीमांसकाः॥ तस्या लक्ष्यमाणगुणसंबंधात्मकत्वेन लक्षणा
नतिरिक्तत्वात्॥ इति लक्षणाप्रस्तावनम्॥ नन्वहमित्र हरिणं पश्य दिशा विनिरानंतरा गौरश्व इति वाक्याद्विशाब्दापत्तिरत आह॥ आकांक्षेत्यादि
अत्रानुकारेण तात्पर्यज्ञानं समुच्चीयते॥ तथा चाकांक्षाज्ञानं योग्यताज्ञानं॥ सन्निधिस्तात्पर्यज्ञानं च शाब्दधीहेतूनामित्यर्थः॥ तेनाकांक्षादि
विपर्यये पि नो हानिः॥ आकांक्षां लक्षयति॥ पदस्येति॥ घटादिलक्षणानामपदस्य पदांतरव्यतिरेकप्रयुक्तिपदं तेस्य व्यतिरेकोऽभावः तत्प्रयुक्त

त० सि० दि० ३३

तत्र योज्यं ॥ अन्वयानुभावकत्वं ॥ शाब्दबोधानुपधायकत्वमाकांक्षेत्यर्थः ॥ एवं धातुपराख्यातपदयोर्गामानयेत्यादिषु वं न तिङन्तयोश्च द्रष्टव्यम् ॥
इत्याकांक्षानिरूपणम् ॥ योग्यतां व्युत्पादयति अर्थेति ॥ पयसा सिंचेत्यत्र पयसि सेककरणत्वस्याबाधितत्वात् योग्यत्वम् ॥ इति योग्यतानिरूपणम् ॥
सन्निधिं व्युत्पादयति पदानामिति ॥ अविलम्बेन पदोपस्थितिः सन्निधिः ॥ क्वचित्तु उच्चारणं तदुपयोगीति तात्पर्यम् ॥ तेन मौनिश्लोकादौ तदभावेऽपि
न शंकार्थकत्वं क्वावकाशः ॥ अयं स्फोटवादः वैय्याकरणमस्तु ॥ अविलम्बेन पदोपस्थितिर्न संपद्यते तत्कारणीभूतपदानुभवजनितसं
स्कारस्यायोगात् ॥ वर्णानामाशुतरविनाशित्वेन पदस्यैवाप्रसिद्धेः सुतरां तदनुभवस्यापि ॥ यदि स्फोटात्मकपदं स्वीक्रियते तदाऽविशिष्टमे
वास्माकं मतमित्याह ॥ तत्र ब्रूमहे ॥ तत्तद्वर्णानुभवजनितसंस्कारकूटमेव सहकारिवशात् ॥ एकैकपोतन्यायेन समूहालम्बनात्म
कपदस्मरणसामञ्जस्ये स्फोटस्याकिंचित्करत्वात् ॥ इति सन्निधिनिरूपणम् ॥ सैन्धवमानयेत्यादौ तात्पर्यज्ञानादेव क्वचिल्लवणस्य क्वचिद ॥ श्वस
बोधात्तस्यापि कारणत्वं संजाघटीति ॥ नानार्थेषु रोधात्प्रकरणादिकं तात्पर्यग्राहकं ॥ द्वारमित्यादौ पिधेहीति शब्दज्ञानादेव शाब्दः ॥ अतः श
ब्दाध्याहार एव युक्तः ॥ ननु पिधानरूपार्थाध्याहारः ॥ पदविशेषजन्यपदार्थोपस्थितेरेव शाब्दबीजत्वात् ॥ इतरथा घटः कर्मत्वमानयनं कृ ३३
तिरित्यादितोऽपि तदापत्तेः ॥ इति तात्पर्यज्ञाननिरूपणम् ॥ आकांक्षादिशून्यवाक्यस्याप्रमाणत्वं निषेधयति ॥ तथा चेति ॥ आकांक्षादि
कं शाब्दहेतुरित्युक्ते चेत्यर्थः ॥ अनाकांक्षाद्युदाहरणं दर्शयति गौरश्व इति वाक्यं विभजते ॥ वाक्यमिति ॥ ईश्वरोक्तत्वादिति ॥ वेदापौरुषेयः

वाक्यत्वाद्भारतादिवदित्यनुमानात्तत्सिद्धिर्बोध्या ननु स्मर्यमाणकर्तृकत्वमुपाधिः ॥ तस्य भारतादौ साध्यव्यापकत्वात् ॥ वेदे साधनाव्यापकत्वाच्चेति
मानाधिष्ठः ॥ वेदेऽपि तस्य सत्त्वात् ॥ अतएव ब्रह्मा वेदकर्तेत्यपि किं वदन्ती ॥ सर्वमिदेवेति ॥ अबाध्यं वाक्यं सर्वमेवेत्यर्थः ॥ तेन आत्मा वै जायते पु
त्र इति वेदस्याप्रामाण्येऽपि न क्षतिः ॥ स्मृतिपुराणेतिहासाचाराणां वेदमूलकत्वेन प्रामाण्यं तन्मूलवेदानामिदानीमनुपलभ्यमानत्वेन क्षतिः ॥ अ
नन्ताश्चैव वेदा इति श्रुतेः ॥ केचित्तु ॥ यत्र वेदमूलकत्वं दृश्यते ॥ तस्यैव प्रामाण्यं ॥ अन्यथा स्मृत्यादिकल्पितवाक्यानामपि तदापत्तेः ॥ न च यत्रर्
षिप्रणीतत्वं तत्र प्रामाण्यं बृहस्पतिप्रणीतनास्तिकसूत्रस्यापि तदापत्तेरिति वदन्ति ॥ इति वाक्यविभागः ॥ नन्वेतावता शाब्दसामग्री प्रपंचि
ता ॥ प्रस्ताविभाजकवाक्ये शाब्दस्योद्दिष्टत्वेन तत्कुतो न प्रदर्शितमत आह ॥ वाक्येति ॥ शाब्दत्वं च शब्दात्प्रत्येमीत्यनुभवसिद्धा जातिः ॥
शाब्दबोधक्रमो यथा चैत्रो ग्रामं गच्छतीत्यत्र ग्रामकर्मकगमनानुकूलवर्तमानकृतिमानिति शाब्दबोधः ॥ द्वितीयायाः कर्मत्वमर्थः ॥ धा
तोर्गमनमनुकूलत्वं संसर्गमर्यादया भासते ॥ लटो वर्तमानत्वं ॥ आख्यातस्य कृतिः ॥ तत्संबंधं वं धं संसर्गमर्यादया भासते ॥ रथो ग
च्छतीत्यत्र गमनानुकूलव्यापारवान् रथ इति शाब्दबोधः ॥ त्वमागच्छतीत्यत्र गमनप्रागभावावच्छिन्नकालीनस्तानकर्तागमनानुकूल
वर्तमानकृतिमानिति शाब्दबोधः ॥ लोट्प्रत्ययस्य कर्तृत्वपूर्वकालीनत्वं चार्थः ॥ भोक्तुं गच्छतीत्यत्र भोजनप्रागभावकालीनभोजनवि
षयकेच्छावान् ॥ गच्छतीत्यर्थः ॥ चैत्रेण पच्यते तंडुल इत्यत्र वृत्तिकृतिजन्यपाकजन्यफलशालीतंडुल इति शाब्दबोधः ॥ वृत्तित्वजन्यत्वं

त॰
सि॰ टी॰
३४

संसर्गवत्त्वम्॥ धातोः पाकः तज्जन्यत्वं कर्मणः फलं॥ आत्मनेपदस्य शालित्वं॥ क्वचिदात्मनेपदमर्थेन भासते॥ चैत्रेण सुप्यते इत्यत्र चैत्रवृत्ति
कृतिजन्यः स्वापः इति शाब्दबोधः॥ चैत्रेऽपतीत्यत्र वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिकपाकजनककृतिमान् चैत्र इत्यर्थः॥ गामानयेत्यत्र गोकर्मक
मदिच्छाविषयानयनानुकूलकृतिमांस्त्वमित्यर्थः॥ ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र कृतिसाध्यबलवदनिष्टाजनकेष्टसाधनं ज्योतिष्टोम
नामयागः स्वर्गकाम इत्यर्थः॥ एवमेव सर्वत्र प्रथमान्तमुख्यविशेष्यकः शाब्दबोधो ज्ञेयः॥ वैयाकरणास्तु धात्वर्थमुख्यविशेष्यक एव शाब्द
बोधः॥ यथा चैत्रः पचति तंडुलमित्यत्र तंडुलनिष्ठविक्लित्त्यनुकूलः॥ चैत्रकर्तृकः पाकः इति बोध इत्याहुः॥ सर्वत्र दृष्टाः संत्येवेत्यत्र क्रियासुक्तैव
कारस्यात्यंतायोगव्यवच्छेदोऽर्थः॥ शंखः पांडुर एवेत्यत्र विशेषणसुक्तैवकारस्यायोगव्यवच्छेदोऽर्थः कार्ण एव ह्यातेत्यत्र विशेष्य॥ सुक्तैवका
रस्यान्ययोगव्यवच्छेदोऽर्थः॥ इति संक्षेपः॥ इदमपि बोध्यम्॥ लटो वर्त्तमानत्वमर्थः॥ लिटोऽतीतपरोक्षत्वं॥ लुटो भविष्यदनद्यतनत्वं॥ लृटो भ
विष्यत्वं॥ लोटो वक्तुरिच्छाविषयत्वं॥ लङोऽभूतानद्यतनत्वं॥ लिङ् धातुर्विधिलिङ्॥ आशीर्लिङ् च॥ तत्र विधिलिङः कृतिसाध्यत्वे सति बलव
दनिष्टाजनकेष्टसाधनत्वं॥ आशीर्लिङो वक्तुरिच्छाविषयत्वं॥ लुङोऽभूतत्वम्॥ लृङोऽतीतत्वं च भविष्यत्वं॥ लृटो भविष्यत्वं॥ लोटो वक्तुरि ३५
च्छाविषयत्वं लङोऽभूतानद्यतनत्वं॥ लिङ् धातुर्विधिलिङ्॥ आशीर्लिङ् च॥ तत्र विधिलिङः कृतिसाध्यत्वे सति बलवदनिष्टाजनकेष्टसाधन
त्वं॥ आशीर्लिङो वक्तुरिच्छाविषयत्वं॥ लुङोऽभूतत्वम्॥ लृङोऽतीतत्वे सति भविष्यत्वं चेति॥ इति शाब्दबोधक्रमनिरूपणम्॥ शाब्दमुपसंहरति

॥ तत्करणमिति॥ सोऽयं शाब्दो विविधः॥ विधिमंत्रार्थवादभेदात्॥ तत्राद्यो विध्यभिधायकप्रत्ययघटितं वाक्यं प्रत्ययो वा स च प्रत्ययः॥ लिङ् लोट् तव्यप्र
त्ययकृत्प्रत्ययरूपः॥ भवति हि ज्योतिष्टोमेन स्वर्गकामो यजेतेति वाक्यं तथा॥ अत्र लिङ्त्वतादृशप्रत्ययः विध्यभिधायके त्यत्राभिधेयविधिर्द्वि
धः॥ स च प्रवर्त्तनाजनकचिकीर्षाजनकज्ञानविषयः॥ कृतिसाध्येष्टसाधनत्वमेव सः॥ इदमेव लिङ् लिङर्थः विध्यर्थ इत्युच्यते लिङ्त्वेन रूपेण विध्य
र्थत्व॥ आख्यातत्वेन प्रयत्नार्थत्वं॥ विध्यर्थ इत्युच्यते घः॥ भवति च यागनिष्ठं तत्॥ यागो मत्कृतिसाध्यो मदिष्टसाधनं चेति ज्ञानविषयः॥ ज्ञा
नातीच्छेति यतनत इति नियमात्॥ ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादि काम्यस्थले अहरहः संध्यामुपासीत यावज्जीवमग्निहोत्रं जुहुयादित्यादि नि
त्यस्थले नैमित्तिकस्थले नैमित्तिकस्थले च चिकीर्षाद्वारा कृतिसाध्येष्टसाधनताज्ञानं प्रवृत्तिप्रतिकारणम्॥ नित्येऽपि संध्यावंदनादौ प्रत्यवायपरि
हारादिकमिष्टं नकलंजं भक्षयेदित्यादौ नञा विध्यर्थस्याभावो बोध्यते॥ अत्र प्राभाकराः॥ कार्यत्वं विध्यर्थः॥ प्रवृत्तकं च कृतिसाध्यताज्ञानं॥ न तु वि
षभक्षणादौ प्रवृत्तिप्रसंग इति चेत्तदनुपपापि न इष्टसाधनताज्ञानं लिंगकं कृतिसाध्यतानुमितिरिष्टसाधनताज्ञानकालीनकृतिसाध्यताज्ञानं वा का
म्यस्थले प्रवर्त्तकमतो नातिदोषः॥ नित्यस्थले चाहमिदानींतनकृतिसाध्यसंध्यावंदनकः॥ ब्राह्मणत्वे सति विहितसंध्याकालीनशौचादिम
त्वात्॥ इति शौचादिमत्प्रतिसंधानजन्यकृतिसाध्यताज्ञानमिति समादधति॥ अप्याननुगममिति चेत्॥ स्वविशेषणवत्ताप्रतिसंधानजन्यत्व
मेव कृतिसाध्यताज्ञानेऽनुगतं स्वं पुरुषः॥ तत्र काम्यस्थले इच्छैव विशेषणं नित्यस्थले च शौचादिकमेवेत्यदोषं यंतिभाट्टास्तु अपूर्वकार्यमेव

विध्यर्थः॥ तस्य सविषयत्वेन॥ यागो विषयः तथान्वयः कस्य कार्यमिति नियोज्याकांक्षायां कार्ये स्वर्गकामस्य नियोज्यत्वेनान्वयः॥ आरोग्यकामो भक्षण
यान्नं कुर्यादित्यादिलौकिकलिङः कार्यत्वेन लक्षणेति गुरूणां मतं नितरां न शोभनं॥ अलं बहीयस्त्वादिति संक्षेपः॥ इति विधिसामान्यनिरूपणम्॥ स त्रिधा॥ अ
पूर्वविधिनियमविधिपरिसंख्याविधिभेदात्॥ तत्र केवलमप्राप्ते विधिरपूर्वः॥ यथा स्वर्गकामो यजेतेत्यादौ॥ अत्र यजनादेरप्राप्तत्वात्॥ यत्रोभ
योः॥ प्राप्तावेकांशो नियम्यते तत्र द्वितीयः॥ यथा व्रीहीनवहन्यादित्यादौ॥ अत्र व्रीहिषु नखावहननयोः॥ प्राप्तौ मुसलावहननमेव नियम्यते॥
सर्वत्र प्राप्तस्यैकत्र विधिस्तृतीयः॥ यथा पंच पंचनखा भक्ष्या इत्यत्र सर्वेषां पंचनखानां भक्षणे प्राप्ते पंचैव पंचनखा भक्ष्या इति विधीयते शश
कः शल्लकी गोधा खड्गी कूर्मश्च पंच पंचनखा इति पंचनखा उद्देश्याः॥ इति विधिविशेषनिरूपणम्॥ अर्थवादस्त्रिधा गुणवादोऽनुवादो भूतार्थवादश्चेति॥
तत्राद्यो यथा॥ आदित्यो यूपो यजमानः प्रस्तर इति॥ प्रमाणान्तरेण निर्णीतार्थस्य ज्ञापकोऽनुवादः॥ यथा अग्निर्हिमस्य भेषजमिति॥ तदुभयभिन्नज्ञा
पको भूतार्थवादः॥ यथा जरायामप्यर्थः शूर इति॥ इत्यर्थवादः॥ मंत्रस्त्वापः॥ पुनन्त्वित्यादिः॥ इति मंत्रवादः॥ ननु शब्दो न प्रमाणान्तरं संसर्गज्ञा
नं तु अनुमानादेव संपद्यते॥ तथा हि गामानयेत्येतानि पदानि स्मारितार्थसंसर्गवन्ति॥ आकांक्षादिमत्पदकदंबकत्वात्॥ मद्वाक्यवदि ३५
ति चेन्न॥ अनुमितिविलक्षणस्य शाब्दज्ञानस्यानुभवसाक्षिकस्यापलपितुमशक्यत्वात्॥ अर्थापत्तिरपि प्रमाणान्तरमस्ति॥ तथा हि
पीनो देवदत्तो दिवा न भुंक्त इति दृष्टे श्रुते वा दिवाभुंजानस्य पीनत्वं॥ रात्रिभोजनं विनानुपपन्नमित्युपपाद्यधर्मवति॥ इयमेवार्थापत्तिः॥ तताऽ

यं देवदत्तो रात्रौ भुंक्त इत्यनुभवो जायत इति मैवं मंस्थाः॥ अयं देवदत्तो रात्रौ भुंक्ते दिवाभुंजानत्वे सति॥ पीनत्वादिति केवलव्यतिरेक्यनुमानेनैव तत्सि
द्धौ तस्या अकिंचित्करत्वात्॥ अनुपलब्धिः प्रमाणं त्वनिराकृतमेव प्राक्॥ संभवोऽपि न प्रमाणान्तरं॥ तथा हि स द्विविधः॥ संभावनात्मको निर्णया
त्मकश्च॥ तत्राद्यो न प्रमाणं॥ यथा ब्राह्मणेषु चतुर्दशविद्याभिज्ञत्वं संभवतीति॥ चतुर्दश विद्याश्च॥ ऋग्वेदश्च यजुर्वेदः सामवेदोऽथर्वणः शि
क्षा कल्पो व्याकरणं छंदो ज्योतिर्निरुक्तयः॥ मीमांसा तर्कशास्त्रं च पुराणं धर्मशास्त्रकं॥ विद्याश्चतुर्दशैतास्तु पुरुषार्थनिदाननिदानिका॥ इति वेदां
तस्य मीमांसायामंतर्भावः॥ वैशेषिकस्य तर्के॥ सांख्यपातंजलपाशुपतवैष्णवरामायणभारतादीनां धर्मशास्त्रे॥ पुराणं च ब्राह्मपाद्मस्कां
दमार्कंडेयशैवब्रह्मवामनशसौरभागवताग्नेयनारदविष्णुब्रह्मवैवर्तलिंगवाराहकौर्ममात्स्यगारुडब्रह्मांडभेदादष्टादशधा॥ वाशिष्ठं लैंग
नारसिंहं नंदीयं नारदीयं वामनीयं हंसं तत्त्वसारं दौर्वासं शिवधर्मकापिलमानववारुणरेणुकवायवीयकालीयमाहेश्वरपाराशरमारीचभा
र्गवादिभेदादुपपुराणानि बहुविधानि॥ मनुयाज्ञवल्क्यविष्णुयमांगिरवशिष्ठदक्षसंवर्तशातातपपाराशरगौतमशंखलिखितहारीत
आपस्तंबोशनसकात्यायन॥ कात्यायनबृहस्पतिदेवलनारदपैठीनसिप्रभृतिकृतानि बहूनि धर्मशास्त्राणि॥ नत्वायुर्वेदधनुर्वेदगांधर्ववे
दार्थशास्त्राणि वेदार्थशास्त्रभेदाच्चतुष्टयमप्यस्ति॥ कामशास्त्रस्यायुर्वेदेंऽतर्भावः॥ नीतिशास्त्रशिल्पिशास्त्राश्वशास्त्रगजशास्त्रसूपका
रशास्त्रचतुःषष्टिकलाशास्त्राणामर्थशास्त्रेऽन्तर्भावः॥ तस्माद्दशरूपविधेति चेत्॥ स्यादेवं शते पंचाशदिति निर्णयात्मकसंभवोऽनुमानेऽन्तर्भ

त॰ सि॰ टी॰ ३० धिकरणत्वेनानाधर्माः स्थाणुत्वपुरुषत्वादयः॥ एतेषां वैशिष्ट्यं संबंधः॥ तदवगाहित्वाज्ञानेसंशयत्वमित्यर्थः॥ घटपटाविति समूहालंबनज्ञानस्य
घटत्वपटत्वरूपविरुद्धनानाधर्मवैशिष्ट्यावगाहित्वादतिप्रसंगवारणायेकस्मिन्निति॥ पटः पृथिवीति ज्ञानस्यएकस्मिन्धर्मिणि पटे यद्व्यपृथिवीत्व
पनानाधर्मवैशिष्ट्यावगाहित्वादतिप्रसक्तिः॥ अतोविरुद्धेति॥ पटत्वविरुद्धघटत्ववान् घटइतिज्ञानवारणायनानेति॥ उदाहरति॥ यथेति॥
॥सत्रिविधः साधारणधर्मधीजन्योऽसाधारणधर्मधीजन्योविप्रतिपत्तिजन्यश्च॥ विशेषादर्शनेकोटिद्वयस्मरणं॥ संशयमात्रेहेतुः॥ तत्राद्यस्य
पदर्शितएव॥ उच्चैस्तरत्वं तत्रसाधारणधर्मः॥ स्थाणुत्वनिश्चायकवक्रकोटरादिमत्वं पुरुषत्वनिश्चायककरादिमत्वं वा विशेषः॥ स्थाणुत्वपु
रुषत्वं चकोटिद्वयं॥ द्वितीयोयथा॥ शब्दत्वंनित्यानित्यव्यावृत्तं॥ शब्दमात्रवृत्तीतिज्ञानेशब्दोनित्योनवेतिसंशयः॥ अत्रशब्दत्वमेवासाधारण
धर्मः॥ तृतीयोयथा॥ प्रामाण्यंस्वतोग्राह्यं परतोग्राह्यं॥ इतिज्ञानेप्रामाण्यंस्वतोग्राह्यंपरतोग्राह्यं वेतिसंशयः॥ ॥इतिसंशयनिरूपणम्॥
विपर्ययंलक्षयति॥ मिथ्येति॥ इतिविपर्ययनिरूपणम्॥ तर्कंलक्षयतिव्याप्येति॥ अत्रवह्न्यभावोव्याप्यः धूमाभावोव्यापकः॥ उदाहरति॥ यथे
ति॥ यद्यपि तर्कस्यविपर्ययात्मकत्वेनपृथग्विभागोनुचितः॥ तथापि॥ प्रमाणानुग्राहकत्वात्॥ सउचितइतिबोध्यम्॥ स्वप्नस्तुपुरीतद्वहि
र्देशांतर्देशयोः संधौमनसिस्थिते॥ अदृष्टविशेषेणचिंताविशेषेणधातुदोषेणवाजन्यते॥ सचमानसविपर्ययेऽन्तर्भूत॥ इदंकि ३१
मित्यनध्यवसायश्चविशेषादर्शनेनजन्यते॥ सचविपर्ययएव॥ इतितर्कनिरूपणम्॥ इतिश्रीसिद्धान्तचंद्रोदयेनर्कसंग्रहव्या॰

ख्यानेतृतीयपरिच्छेदेऽयथार्थानुभवनिरूपणंसंपूर्णम्॥ स्मृतिं विभजते॥ स्मृतिरपीति॥ प्रमाजन्येति॥ स्वजन्यसंस्कारसंबंधेनप्रमायाः स्मृ
तिकारणत्वमितिभावः॥ अप्रमाजन्येति॥ इदंरजतमित्यप्रमातोरजतत्वेनशुक्तिस्मरणमयथार्थम्॥ इतिस्मरतिनिरूपणं॥ ॥इतिश्रीसिद्धा
न्तचंद्रोदयेतर्कसंग्रहव्याख्यानेतृतीयपरिच्छेदेबुद्धिनिरूपणंसमाप्तम्॥ सुखंनिरूपयति॥ सर्वेषामिति॥ सर्वात्मनांअनुकूलमिति॥ वेद्यंयत्॥ त
त्सुखमित्यर्थः॥ अनुकूलत्वंच॥ इष्टत्वं अहंसुखीत्यनुभवसिद्धसुखत्वजातिमद्धर्ममात्रासाधारणकारणकगुणोवासुखम्॥ तच्चतुर्विधं॥ वै
षयिकाभिमानिकमानोरथिकाभ्यासिकभेदात्॥ विषयसाक्षात्कारजंप्रथमं॥ राज्याधिपत्यपांडित्यगर्वादिजंद्वितीयं विषयध्यानजंतृतीयं॥ सू
र्यनमस्कारयामादिजंचतुर्थं॥ इतिसुखनिरूपणम्॥ दुःखंनिरूपयतिप्रतिकूलेति॥ प्रतिकूलत्वंचद्विष्टत्वं॥ दुःखत्वजातिमद्धर्ममात्रा
साधारणकारणकगुणोवादुःखं॥ इदमपिपूर्ववच्चतुर्विधम्॥ इतिदुःखनिरूपणं॥ इच्छांनिरूपयति॥ इच्छेतिकामइतिपर्यायः॥ इच्छात्ववतीच्छा
साद्विधा॥ फलेच्छाउपायेच्छाच फलंसुखादिकमुपायोयागादिः॥ इतीच्छानिरूपणम्॥ द्वेषंनिरूपयति॥ क्रोधइतिद्वेष्मीत्यनुभवसिद्धद्वेषत्वजा
तिमान्द्विष्टसाधनताज्ञानजन्यगुणोवाद्वेषः॥ इतिद्वेषनिरूपणम्॥ प्रयत्नंनिरूपयति॥ कृतिरिति॥ प्रयत्नत्वजातिमान्प्रयत्नः॥ सत्रिविधः॥
प्रवृत्तिनिवृत्तिजीवनयोनिभेदात्॥ इच्छाजन्योगुणःप्रवृत्तिः द्वेषजन्योगुणोनिवृत्तिः॥ जीवनादृष्टजन्योगुणोजीवनयोनिः सचप्राणसंचारकः
॥इतिप्रयत्नंनिरूपणम्॥ धर्मंनिरूपयति॥ विहितेति॥ वेदविहितेत्यर्थः॥ सचकर्मनाश्यःगंगास्नानकीर्तनभोगतत्वज्ञानानपश्यति॥ अथ

त॰ परमप्रयोजनं मोक्ष इत्याचक्षते॥ स च स्वर्गादिरिति मीमांसकाः॥ नित्यसुखाभिव्यक्तिरिति तदेकदेशिनः॥ अहंकारनिवृत्तावौदासीन्यमिति सांख्यज्ञाः॥ ब्र
सि॰ टी॰ ह्मांशकजीवस्याविद्याप्रभवमिथ्यात्वनिवृत्तौ स्वस्वरूपताधिगम इति वेदांतिनः॥ सारूप्यसालोक्यसामीप्यसायुज्यभेदाच्चतुर्विध इति सगुणोपा
५० सकाः॥ अपराधीनतेति चार्वाकाः॥ दुःखदुर्गतिरित्यपि केचित्॥ तत्सर्वं धीमाताचिंतनीयम्॥ अपि तु॥ आत्यंतिकैकविंशतिदुःखध्वंसः॥ आत्यंतिकत्वं च स्व
समानाधिकरणदुःखप्रागभावासमानकालीनत्वं॥ एकविंशतिदुःखानि च॥ शरीरं षडिंद्रियाणि षड्विषयाः षड्बुद्धयः सुखं दुःखं चेति॥ दुःखानुषंगित्वाच्छरीरादी
नां दुःखत्वं॥ तथा चात्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इति श्रुतेरात्मज्ञानसाधनं निदिध्यासनं साधनमनसाधनं श्रवणं परार्धज्ञाने संजात
रीति॥ एवं सति तत्त्वज्ञानेनानात्मशरीरपुत्रादावात्मत्वस्वीयत्वाभिमानरूपमिथ्याज्ञानस्य नाशः॥ तेन दोषाभावः॥ तेन प्रवृत्त्यनुत्पत्तिः॥ ततस्तत्कालीनशरी
रेण कायव्यूहेन वा भोगेन तत्त्वज्ञानाभ्यासचितप्रारब्धकर्मणां नाशः॥ ततो जन्माभावः॥ ततो मोक्ष इति क्रमः॥ नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयं ज्ञानं च विम
लीकुर्वन्नभ्यासेन च पाचयेत्॥ अभ्यासात्पक्वविज्ञानः कैवल्यं लभते नर इत्यादिवचनात्॥ तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति श्रुतेश्च सगु
णोपासनाकाशीमरणादेरपि तत्त्वज्ञानद्वारा मुक्तिहेतुत्वं॥ अत एव यत्र मे अमरः कास्यां तारकमुपदिशतीति सारं॥ ॥इति श्रीसिद्धांतचंद्रोदये तर्कसंग्रहव्या
ख्याने मोक्षनिरूपणं नाम दशमः परिच्छेदः॥१०॥ सामाम्नायगकौशिकान्वयभव श्रीवेंकटेशात्मजः॥ शेषी नाम मतीजनिर्द्राविडभूकोपंपुरासंस्थितिः॥ कृ ५०
त्वा तत्त्वरसाय भावममलं सिद्धांतचंद्रोदयं कुर्वे सद्वसहस्रपद्यकिरणं श्रीचंद्रचूडार्पणं॥ सपादशतकन्यूनशतकन्यूनशरसंचसहस्र
के॥ भूतेकसौ च सिद्धांतचंद्रोदय इहोद्भूतः॥ इति श्रीसिद्धांतचंद्रोदये समाप्तिर्विजयसति॥ शुभमस्तु सर्वेषां॥ ॥ ॥ ॥ ॥ ॥ ॥